
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

आ०
१

श्रीरामायनमः ॥ ॥दीप्तित्तोरणायत्तेषु विबुधानन्ददायिषु ॥ हरिरब्धिसुताबक्त्रसोमपी
तीपुनातुवः ॥१॥ अहोरात्राश्रितोधर्म इह बाजसनेपि नाम ॥ निवध्यते निवद्धोपोधर्म
शास्त्रनिवंधिभिः ॥२॥ तत्र मनुः ब्राह्मेमुहूर्त्ते वुध्येत धर्म्मार्थौ चानुचिंतयेत् ॥ कायक्लेशां
श्चतन्मूलान्वेदतत्वार्थमेवच ॥३॥ ब्राह्मोमुहूर्त्तः संध्यापूर्वदण्डद्वयात्मकः ॥ तन्मूलान्धर्मा
र्थहेतुकक्रियानिमित्तकान् ४ वेदतत्वार्थमिति तत्परमपन्यायप्रतीतार्थ [illegible]
वारणार्थम् वेदतत्वार्थो ब्रह्मेत्येके ॥ विष्णुपुराणे ब्राह्ममुहूर्त्ते स्वस्थे च मानसे म
तिमान्नृप विबुधश्चिन्तयेधर्म्ममर्थं चास्याविरोधिनम् अपीड्यातयोः काममु
भयोरपिचिन्तयेत् अनुत्रपुरीषोत्सर्गोविधिः तत्र विष्णुपुराणे ततः कल्यं समु
त्थाय मैत्रं कुर्यान्नरेश्वरः नैऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः मैत्रं पुरी

षोत्सर्गः मित्रदेवताकं पायुसंबधात् ॥ नैऋत्यां शापनस्थानात् ॥ आपस्तम्बः ॥ मूत्रपुरी
षे कुर्य्याद्दक्षिणां दिशं दक्षिणापरां वा गत्वेति शेषः ॥ दक्षिणापरा नैऋती ॥ तथा ॥ अस्त
मिते च बहिर्ग्रामादाचावसथान्मूत्रपुरीषयोः कर्मवर्जयेत् · आरात् दूरे · आवसथात् · गृहा
त् ॥ तत्र वायुपुराणे ॥ शुष्कैस्तृणैस्तथा काष्ठैः पत्रैर्वैणुदलैनवा ॥ मृन्मयैर्भाजनैर्वापि अ
न्तर्धाय वसुंधराम् ॥ तृणैः कुशादिव्यतिरिक्तैः ॥ काष्ठैः पलाशादिव्यतिरिक्तैः ॥ तृणमयज्ञियं का
ष्ठमित्यापस्तम्बवचनात् ॥ मनुः ॥ मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः ॥ दक्षिणाभिमु
खो रात्रौ संध्ययोश्च यथा दिवा ॥ एवं च मनुना सर्वकालव्यापिमुखनियमविधानात् ॥ प्रत्य
ङ्मुखस्तु पूर्वाह्णे अपराह्णे पराङ्मुखस्तथा ॥ उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुख इति यम
वचनम् ॥ सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुख इति देवलवचनं ॥ मन्वर्थविपरीताव

नादर्तव्यम् ॥

३

पास्मृतिः स्नानप्रास्पत इति बृहस्पतिवचनात्॥ अथवा मानवं दिवापरं प्रातर्मध्याह्ने परमिति
न विरोधः॥ मनुर्मनुः॥ छायायामंधकारे वा रात्रावहनि वा द्विजः॥ यथासुखमुखः कुर्य्यात्प्रा
णाबाधभयेषु च॥ रात्रावहनि वेत्युक्ते संध्यायामुदङ्मुखत्वं नियम एव॥ अत्र शांखायनगृ
ह्यम्॥ यद्येकवस्त्रोपयज्ञोपवीतं कण्ठे कृत्वा॥ द्विवस्त्रतापक्षे तु॥ नियम्य प्रयतो वाचं सम्वी
तांगोवगुण्ठितः इति मनुवचनात्॥ निवीतमेव कर्त्तव्यम्॥ तच्च पृष्ठलम्बितं॥ निवीतमापृष्ठ
देशावलंबनं ग्राम्यधर्मेष्विति निगमपरिशिष्टे सुदर्शनात्॥ ग्राम्यधर्मो मैथुनम्॥ कण्ठ
इति व[illegible]चनमाधर्य्यं तेन मूत्रपुरीषोत्सर्गपरिग्रहः॥ अत्र हारीतः॥ ब्राह्मणस्यं वासस्स
वेष्टयित्वा मृद्धात्रीं ग्रीवायामासज्य दक्षिणे बाहुपार्श्वे कमण्डलुमाधाय मृद्धात्रीं मृत्तिका
पात्रीम्॥ यमः॥ शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनं॥ मनुः॥ न मूत्रं पथि कुर्वी

म२

राम०

तमस्तके॥ पर्वतनिषेधादेव पर्वतमस्तकनिषेधे सिद्धे पुनस्तन्निषेधो यत्रापि पर्व ४

तन भस्मनि न गोव्रजे॥ न फालकृष्टे न जले न चित्यां न च पर्वते॥ न जीर्णदेवायतने न वल्मीके कदाचन॥ न ससत्त्वेषु गर्तेषु न जलाभ्यन्तरेषु च॥ न गच्छन्नाप्यवस्थितः॥ मूत्रमिति पुरीषस्याप्युपलक्षणं॥

ति॰२ चितिरग्निचयस्थानं॥ चिता वा॥ न जीर्णदेवायतन इति दृष्टार्थं॥ इष्टकादिपातसंभवात्॥ परमस्मृतौ॥ चरेद्देवायतननिषेधो वक्ष्यते॥ ससत्त्वेषु प्राणिमत्सु॥ तथा॥ न नदीतीरमासाद्य न च पर्वतोऽप्राक्यपरीहरस्तत्रापि मस्तकवर्जनार्थः॥ शेखरः॥ वापीकूपनदीगोष्ठचित्यंभःपथिभस्मसु॥ अग्नौ काम्ये श्मशाने च विराम्मूत्रं न समाचरेत्॥ वाप्यादिपदं जलरहितभूभागनिषेधार्थं॥ अंभःपथग्रुपाराना॥त्॥ काम्ये क्षेत्रस्थाने॥ अत्र विष्णुः॥ नोत्खरेन पाद्वलेन पराङ्मुखो नोधानोदकसमीपयोर्न्नाकाशे॥ आकाशेऽन्तरसंवन्तरेणे॥ तदुक्तं॥ वायुपुराणे॥ यदाकाशःस्मृतो भूमिमस्तस्मान्नासंवृतो क्वचित्॥ कुर्यान्मूत्रपुरीषे वा न भुंजीत पिबेन्न च॥ एवं चाकाशेऽन्तरालिकास्थित इति व्याख्यानमशुद्धं॥ अत्र यमः॥ पत्वला

5

श्रा॰
३

नितडागानि नदीप्रस्रवणानि च॥ न गोमयभस्मानि फालकृष्टानि वर्जयेत्॥ तुषाङ्गारकपालानि वृक्ष
छायां देवपथं चतुष्पथं॥ उदकं चोदकान्तं च पंथानं च विवर्जयेत्॥ वर्ज्जयेद्भस्मलानि चैत्यश्वभ्रविला
नि च॥ उपरुद्धो वेगी॥ पंथानमित्यनेनैव वर्त्मनिषेधे सिद्धे राजमार्गं च तुःपथोपादानं राडधारणारू
पदश्वप्रयोजनकं॥ हलायुधनिबंधे तु समीपलक्षणोक्ता॥ चैत्यो ग्रामप्रसिद्धहेतुर्महावृक्षः॥ श्वभ्रं विदीर्णो
भूभागः॥ हारीतः॥ न चत्वरोपद्वारयोर्मूत्रपुरीषे कुर्यान्नतीर्थे न सस्यपूर्णे क्षेत्रे न पत्तियानां वृक्षा
णामधस्तात्॥ चत्वरं नानाजनावस्थानदेशः॥ काकादिबलिस्थानमित्ते॥ केचित् उपद्वारं द्वारसमीपं
तीर्थं पुण्यदेशं प्राहुः॥ आपस्तंबः॥ छायायां मूत्रपुरीषयोः कर्म वर्जयेत्॥ स्वामन्त्रव मेहेत्॥ छायायां पथि
कानुपजीव्य छायां नोपजीव्य छायायामिति स्मृत्यन्तरात्॥ स्वामन्त्रव मेहे तेत्पनुष्ठाने वलाच्च पुरुषान्ता
छायापि निषिद्धा॥ तथा॥ न सोपानत्को मूत्रपुरीषे कुर्यात्॥ अत्र मनुः॥ न गच्छन्नापि च स्थितः स्थि
ऊर्ध्वः॥ शांखलिखितौ॥ नांतर्वाससा निर्वासाः कुर्यात्॥ मूत्रपुरीषे इति शेषः॥ गौतमः॥ न वाय्वग्नि
देवतायतनानि च॰ राजमार्गश्मशानानि हे ग्राणि चवलानि च॰ उपरुद्धो न से १ यु॰

तडागवनतरा
मार्गेइसे ७

को। लोष्टेनप्रमृजीतशुष्ककाष्ठेनवाप्रमृजीतलिंगगुदे इति शेषः ५

विप्रादित्यापोदेवतागाश्च प्रतिपश्यन्मूत्रपुरीषामध्यान्युत्सृजेत्॥ देवताः विष्ण्वादिप्र
तिमाः॥ अमेध्यानि श्लेष्मादीनि॥ अत्र याज्ञवल्क्यः॥ न प्रत्यग्न्यर्कगोसोमसं
ध्याम्बुस्त्रीद्विजन्मनः॥ अत्र सांख्यापनगृह्यम्॥ नादित्याभिमुखो जबन्ये॥ यमः॥ हन्ति मेहतः
प्रज्ञां प्रतिपंथानमेव च॥ विष्णुपुराणे॥ तिष्ठेन्नातिचिरं तत्र॥ तत्र मूत्रपुरीषयोत्सर्जनस्था
ने॥ अत्र हारीतः॥ लोष्टेन प्रमृजीत शुष्ककाष्ठाभावे॥ नपर्णलोष्ठाश्मभिर्मूत्रपुरीषापक
र्षणं कुर्यादिति गौतमनिषेधात्॥ व्यासः॥ नाश्मभिर्न फलाकाष्ठैर्न ज्वालास्थिवर्हिषा॥
आपस्तम्बः॥ नाद्भिर्नौषधिवनस्पती नूर्ध्वा नाभि मूत्रपुरीषयोः स्रंसनं कुर्यात्॥ अथ श
शौचं॥ तत्र याज्ञवल्क्यः॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं
शौचं कुर्यादतंद्रितः॥ अतंद्रितो नलसः॥ एतच्च जन्म्यन्तरविहितसंरक्षानुज्ञानार्थं॥

अतो गंधलेपक्षयारेव शौचं संख्यानियमस्त्वदृष्टार्थ इति व्याख्यानमप्युक्तं ॥ शुद्धिमभी-
प्सतेति श्रवणात् ॥ ब्रह्मपुराणे ॥ उद्धृतोदकमादाय मृत्तिकां चैव वाग्यतः ॥ उदङ्मुखो दिवा
कुर्याद्रात्रौ चेद्दक्षिणामुखः ॥ मृत्तिकाग्रहणं ग्रीवासक्तमद्धात्रीतः ॥ हारीतानुसारात् ॥
तदसंभवे अन्यतोपि कुर्यात् ॥ शौचमिति शेषः ॥ यमः ॥ आहरेन्मृत्तिकां विप्रः कूलात्स-
सिकतां तथा ॥ नारवल्कष्टान्न वल्मीकान्न पांशुलान्न च कर्दमात् ॥ न मार्गान्नोषराच्चैव
शौचशिष्टां परस्य च ॥ विप्र इति शौचकर्तृमात्रोपलक्षणं ॥ कूलादिति पुंश्चिद्रोपलक्ष-
णं ॥ विष्णुपुराणे ॥ वल्मीकमूषकोत्खातां मृदमन्तर्जलां तथा ॥ शौचावशिष्टां गेहाच्च ना-
दद्यात्क्षेपसंभवाम् ॥ अंतःप्राण्यवपन्नां च हलोत्खातां च पार्थिव ॥ परित्यजेन्मृदस्त्वेताः
सकलाः शौचसाधने ॥ अन्तःप्राण्यवपन्नां सकीटाम् ॥ अथ ब्रह्माण्डपुराणे ॥ सुनिर्णि-

क्षेऽम्यद्रद्यान्मृदन्ते त्वप एव च॥ मुनिशौक्ते केवलजलप्रक्षालिते॥ तथा च गौतमः॥ गंधलेप
यकर्षणं शौचममेध्यस्य तत्राद्भिः पूर्वं मृदा चेति॥ एवं च मुनिशौक्ते पदं काष्ठादिप्रोक्षितगुदहानु
वादकमिति व्याख्यानमशुद्धं॥ व्यर्थत्वात्॥ अत एव मुनिशौक्ते सुप्रक्षालिते बाह्वादाविति
कल्पतरौ व्याख्यानं॥ मनुः॥ एका लिंगे गुदे तिस्रस्तथैकत्र करे दश॥ उभयोः सप्त दातव्या मृदः
शुद्धिमभीप्सता॥ एकत्र वामे॥ शंखः॥ मृत्तिका तु समुद्दिष्टा त्रिपर्वी पूर्यते यया॥ अयं च
परिमाणविधिर्गुदं विहायान्यत्र बोधव्यः॥ अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥ द्वि
तीया च तृतीया च तदर्द्धं परिकीर्तितेति दक्षेण गुदे परिमाणान्तरविधानात्॥ अत्र च लिं
गे मृत्तिका द्वयं गुदे पंच सप्त वा वामकरे चतुर्विंशतिर्वा त्रिंशद्वा हस्तद्वये चतुर्दश षोडश मृ
त्तिकाः स्मृत्यंतरे विहिताः॥ ताश्च लेपानुवृत्तिशंकायां बोधव्याः॥ अन्याङ्गिकारान्मा

श्रा॰ प्र

॥पू॥ नवकल्प एव॥ बहुभिः संवादात्॥ मानवपक्षेपि वामकरपृष्ठेपि सप्तमृत्तिकादेयाः॥ षट् पृष्ठ इति
हारीतवचनात्॥ अत्र यमः॥ तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्॥ अत्र हस्तयोरिति शेषः
पुनः ३ एवं च सप्तमृत्तिका इति ब्रह्मपुराणीयं लेपतं कापं॥ पुनर्यमः॥ तिस्रस्तु पादयोर्देयाः शुद्धकामस्य नित्य
शः॥ तिस्र इति प्रतिपादम्॥ इदं चात्यन्तशंकापं॥ अन्यथा तु प्रतिपादमेकैका पादयोर्द्वे इति ब्रह्मपुरा
णात्॥ तत्र मनुः॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं तु वनस्थानां यतीनां तु चतु
तु र्गुणं॥ इदं द्वैगुण्यादिसंख्यामात्रे तदनन्तरमेवाभिधानात्॥ न्यूनाधिकं न कर्तव्यं॥ शौचं शुद्धि
मभीप्सतेति दक्षेणोक्तेः संख्यापरिमाणोभयविषयं विशेषाभावात्॥ एवं च यावत्साध्विति मन्ये
व २ तताच्छौचं विधीयते॥ प्रमाणं द्रव्यसंख्या वा न [illegible]घे रूपादि दृश्यते इति देवलवचनं चातुराश्रम्यादिम
त्र तत्र संख्यादेरश्रवणात्॥ उदकविषयं वा॥ दातव्यमुदकं तावद्यावत्स्यान्मृत्तिकाक्षय इति दक्षो

आ॰ ॥५॥ पृ

नवकल्पएव॥बहुभिः सम्वादात्॥मानवपक्षेपिवामकरपृष्ठेपिषरामृत्तिकादेयाः॥षट्‌पृष्ठइति
हारीतवचनात्॥अत्रयमः॥तिस्रस्तुमृत्तिकादेयाः कृत्वातु नखशोधनम्॥अत्रहस्तयोरितिशेषः
पुन ३ एवंचसैमृत्तिका इतिब्रह्मपुराणीयंत्वेपक्षंकायां॥पुनर्यमः॥तिस्रस्तुपादयोर्देयाः शुद्धकामस्यनित्य
सः॥तिस्रइति प्रतिपादम्॥ इदंचात्यन्तशंकायां॥अन्यथातुप्रतिपादमेकैका पादयोर्द्वे इतिब्रह्मपुरा
णात्॥तत्रमनुः॥एतच्छौचंगृहस्थानां द्विगुणं ब्रह्मचारिणां॥त्रिगुणंतुवनस्थानांयतीनांतुचतु
तु र्गुणं॥इदंद्विगुणत्वादि संख्यामात्रेतदनन्तरमेवाभिधानात्॥न्यूनाधिकंनकर्तव्यं॥शौचंशुद्धि
मभीप्सतेतिदक्षेणोक्तं संख्याप [illegible] रिमाणोभयविषयंविशेषाभावात्॥एवंचयावत्साध्वितिमन्ये
व २ ततोऽच्छौचंविधीयते॥प्रमाणंद्रव्यसंख्यावान [illegible] घैरुपदिश्यतेइतिदेवलवचनंचातुराश्रम्यादस्म
त्रतत्रसंख्यादरस्त्रवणात्॥उदकविषयंवा॥दातव्यमुदकंतावद्यावत्स्यान्मृत्तिकाक्षयइतिदक्षे।

रोक्तत्वात्॥ आपस्तम्बः॥ अन्हि शौचं यथा प्रोक्तं निश्यर्द्धं तु तदिष्यते॥ पथि पादस्तु विज्ञे
यश्चार्त्तः कुर्य्याद्यथावलं॥ अथ ऋष्यशृंगः॥ यस्मिन्स्थाने कृतं शौचं वारिणा तच्च शोधयेत्॥
नशुद्धिस्तु भवेत्तस्य मृत्तिकायां योन शोधयेत्॥ मूत्रमात्रोत्सर्गे दक्षः॥ एका लिंगे तु सव्ये त्रि
रुभयोर्मृ[illegible]द्वयं स्मृतं॥ बौधायनः॥ मूत्रवद्रेतः समुत्सर्गे॥ देव[illegible]लः॥ धर्मविद्दक्षिणं हस्तम
धः शौचे न योजयेत्॥ तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत्॥ प्रवृत्तिस्थितिरेषा स्यात्कारणा
दुभयक्रिया॥ कारणाद्रोगादेः उभयक्रिया दक्षिणहस्तेनाधः कायशोधनं वामहस्तेनोर्द्ध्वका
यशोधनं॥ शौचान्तरं हारीतः॥ गोमयेन मृदा वा कमण्डलुं परिमृज्य पूर्ववदु[illegible]पस्पृश्य[illegible]
दित्यं सोममग्निं वा वीक्षेत॥ अत्र दिवा आदित्यं रात्रौ सोममेतयोरभावेऽग्निमिति वो
ध्यं॥ ब्रह्मपुराणे॥ पादयोर्द्वे गृहीत्वा तु सुप्रक्षालितपाणिना॥ त्रिराचम्य ततः शुद्धः स्मृ

त्वा विष्णुं सनातनं॥ अत्र शंखलिखितौ॥ आचम्येशानं मनसा ध्यायेत्॥ व्यासः॥ शौचं कृ

श्रा० २ त्वा मूत्रोत्सर्जनं पश्येद्वादित्यमग्निं सोमं वा पश्येत्॥ अत्र च वशिष्ठेन गोब्राह्मणादर्शनमधिकमु

क्तं॥ अथाचमनविधिः॥ तत्र देवलः॥ प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः॥ उदङ्मुखो

वा दैवत्यपैतृके दक्षिणामुखः॥ शिखां बध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे॥ [illegible] एवं चैत

द्दर्शनात्स्वस्य कृपादावसेचनमित्यापस्तम्बीयं पश्चिमाभिमुखत्वं केवलपादप्रक्षालनविष

यं॥ तथा॥ इत्येवमद्भिराजानुप्रक्षाल्य चरणौ पृथक्॥ हस्तौ चामणिबंधाभ्यां पश्चादासीत सं

श्रा० यतः॥ अथापः प्रथमात्तीर्थाद्दक्षिणात्त्रिः पिबेत्समं॥ अशब्दमनवच्छावमवहिर्जान्ववुद्बु

॥ ६ ॥ दं॥ अजान्विति अधश्चरणादिना तत्पर्यंतमशौचे। आजानुभ्यां पादाविति॥ [illegible]

[illegible] स्वस्य स्पर्श इति ब्राह्मणस्य पक्षे॥ चतुर्वेति त्रिसचमनापरितोषपक्षे॥ एवं चतुर्वेति

हारीतोक्तेः॥ अथ भविष्यपुराणे॥ समोचचौरंगोक्त्वा तथा बद्धशिखो न प॥ चुना
कुं लिकरं कृत्वा एकाग्रः सुमना द्विजः॥ नरसिंहपुराणे॥ दक्षिणं तु करं कृत्वा गो
कर्णाकृति मत्तुनः॥ त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेत्॥ मनुः॥ ब्राह्मेण
विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्॥ कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन॥ वि
प्रइत्याचमनकर्त्तमात्रोपलक्षणं॥ आचमने देशेन तीर्थविधानात्॥ कायं प्राजापत्यं
त्रैदशिकं दैवं॥ अत्र संभवे ब्राह्मतीर्थेनैवाचमनं॥ नित्यकालमिति श्रवणात्॥ ब्राह्मादि
नाब्राह्मतीर्थावरोधे कायत्रैदशिकाभ्यामिति व्यवस्थितविकल्पः॥ पित्र्यं तु सदा निषि
द्धं न कदाचनेत्यभिधानात्॥ याज्ञवल्क्यः॥ कनिष्ठादेशिन्यंगुष्ठमूलान्य

स्मा०
१

गंकरस्य तु ॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ देशिनीतर्ज्जनी ॥ हारी
तः ॥ अन्तरूर्वोररत्नी कृत्वा त्रिरपोऽशब्दं पिबेत् ॥ याज्ञवल्क्यः ॥ अद्भिस्तु प्रकृति
स्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ हृत्कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः ॥ शुध्येरन्
स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥ अन्ततः उपप्रान्तेन ॥ आपस्तम्बः ॥ भूमिगतास्व
प्स्वाचम्य प्रयतो भवेत् ॥ यद्यप्रयत आचमेत् ॥ भूमिगतास्विति ॥ उद्धरणास्थानमपे
क्षितम् ॥ उद्धृतपरिपूताभिरद्भिरिति शंखलिखितवचनात् ॥ [illegible] गौतमः ॥ शुचौ
देशे आसीनो दक्षिणं बाहुं जान्वन्तरे कृत्वा यज्ञोपवीत्यामणिबंधात् ॥ पाणिं प्रक्षा
ल्य वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वा अप आचमेत् ॥ पादौ चाभ्युक्षेत ॥ खानि चोपस्पृशेत् ॥ शीर्षण्यापा
नि मूर्ध्नि दध्यात् ॥ हृदयस्पृश इति ब्राह्मणापक्षे ॥ चतुर्वेति त्रिराचमनापरितोषपक्षे ॥ एवं चतुर्वेति ॥ राम ॥

फलमस्यार्थमिति व्याख्यानमयुक्तं ॥ कल्पना प्रसंगात् ॥ खानि इंद्रियाणि उपस्पृशेदि त्यत्रा
द्भिरित्यपेक्षते ॥ तदुक्तं गोभिलगृह्ये । इंद्रियाण्यद्भि संस्पृशेदक्षिणी नासिके कर्णौ चेति ॥
मनुरप्याह ॥ खानि चैव स्पृशेदद्भिरिति ॥ दक्षः ॥ प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितं ॥ संवृ
त्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं ॥ संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् ॥ अङ्गुष्ठेन
प्रदेशिन्या घ्राणं पश्चादनन्तरं ॥ अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे पुनः पुनः ॥ नाभिं कनिष्ठा
ङ्गुष्ठाभ्यां हृदयं तु तलेन वै ॥ सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् ॥ तिसृभि स्त
र्जनीमध्यमानामिकाभिः ॥ अत्र घ्राणस्य चक्षुषः श्रोत्रस्य स्पर्शनं पुटद्वये ॥ तदभि
प्रायेणैव पुनः पुनरिति ॥ बाहुस्पर्शनं चांसदेशे ॥ तथा शंखः ॥ तर्जन्यङ्गुष्ठयोगेन स्पृशे
न्नासापुटद्वयं ॥ मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः ॥ अङ्गुष्ठस्यानामिकायाश्च

15

आ०   द्वि१   ना१

॥२॥ योगेनश्रवणेस्यश्रोत्र॥कनिष्ठाङ्गुष्ठयोगेनस्पृशेत्स्कंधद्वयंततः॥ हृदयस्पर्शान्तरं॥भविष्यपुराणे॥पञ्चस्था
नुष्ठके वीरसमुत्पद्यन्तिमानवः॥वासुकिप्रमुखान्नागास्ते नप्रीणातिभारत॥देवलः॥सोपानत्कोज
लस्थोवामुक्तकेशोपिवाद्विजः॥उष्णीषीवापिनाचामेद्वस्त्रेणोद्धृष्यवाशिरः॥तथा॥नागच्छन्नप्रायान
त श्चनचलन्नपरांस्पृशन्॥नहसन्नेवसंजल्पन्नात्मानंचैववीक्षयन्॥केशान्नीवीमधःकाय
मस्पृशन्धरणीमपि॥यदिस्पृशतिचैतानिभूयःप्रक्षालयेत्करं॥आत्मानंहृदयंवीक्षन्निति[illegible]स्वार्थेणि
च॥अधःकायोनाभ्यस्तया॥व्यासः॥शिरःप्रावृत्यकंठंवामुक्तकच्छशिखोपिवा॥अकृत्वापादयोःशौचमा
त्र चान्तोप्यशुचिर्भवेत्॥ब्रह्माण्डपुराणे॥कंठंशिरोवाप्रावृत्यरथ्यापणगतोपिवा॥आपणः क्रयविक्रय
भूमिः प्रचेताः॥नानन्तर्वाससानाप्सुकुर्वन्नाचामेध्येः॥अनन्तर्वासा अधोवस्त्रशून्यः॥अत्रगोभिलः॥ना
न्तरीयैकदेशेनकृत्स्नोपवीतोत्तरीयकम्॥प्राशायनः दानमाचमनंहोमंभोजनं॥देवतार्चनम्
प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणम्॥आसनारूढपादः श्री०॥श्री०॥श्री०॥

स्तु जानुनोर्जंघयोस्तथा॥ कृतावसक्थिको पश्च प्रौढपादः स उच्यते॥ मरीचिः॥ न वहिर्जानुर्न त्वरया नासनस्थो न चोत्थितः॥ न पादुकास्थो नान्यचित्तः शुचिः प्रयतमानसः॥ तथा मुक्तासनस्थो प्याचामेन्नान्यकाले कदाचन॥ गोभिलः॥ जानुभ्यामूर्द्ध्वमाचम्य जलेतिष्ठन्नदुष्यति॥ पैठीनसिः॥ अन्तरुदकमाचान्तोऽन्तरे वहिः शुध्यति॥ वहिरुदकमाचान्तो वहिरेव विशुध्यति॥ तस्मादन्तरेकं वहिरेकं पादं कृत्वाचामेत सर्वत्र शुद्धो भवति॥ स्नानप्रकरणे एवास्य सत्वात्तत्रैवायं नियमो न त्वन्यत्रापि॥ व्यासः॥ आपः पाणिनखाग्रेण आचमेद्यस्तु वै द्विजः सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत्॥ वौधायनः॥ पादप्रक्षालनोच्छिष्टेन नाचमेत्॥ पद्यार्चमेनं मौ त्रावयित्वाचमेत॥ आपस्तम्बः॥ नात्योदकप्रोषेणावधाकर्माणि कुर्वीत॥ चामेन वर्षधारास्वाचमेन्न प्रदरोद्धृतपाणिसंस्रुतोदके नैकपाणावर्जितेन नाचमेत॥ तथा॥

18

आ०

॥ ९ ॥

इकेनतस्याभिख्याकारणात्॥ प्रदरीविदीर्णाभूभागः॥ अकारणात्॥ रोगादिव्यतिरेकेण॥ अत्रव
शिष्टः॥ प्रदराद्वियोगोक्तपर्णायस्युर्नवरोगरसदुष्टाभिर्पीम्बस्युरशुभागमाः॥ अशुभागमाः॥
आशुविदेशादागताः॥ अत्रशंखलिखितौ॥ नशूद्राशुच्येकपाणावर्जिताभिः॥ अत्राशुविग
एकपाणिनापरेणतस्यैकोत्क त्वादन्यत्रापि लुप्ततीयापरैवचेषम्यार्थं अत एकपाणिर्यस्ये
तिव्युत्पत्त्या एकपाणिः पुरुषः॥ नत्वेकस्यासौ पाणिश्चेतिसमासः वर्जितं जलं निषिद्धं॥ शूद्रसा
हचर्यात्॥ मूत्रपुरीषेकुर्वन्दक्षिणहस्तेन गृह्णातिसव्य आचमनीयमितिवोद्दापनेनवा
मकरे[illegible]ककमराउलुधारणाविधानाचेतिप्रपंचितं छन्दोगाह्निके॥ आचमनीयमाचनंकुर्वन्स
व्यकमंडलुं गृह्णातीत्यर्थः एतेन वामकरावर्जितत्वं व्यक्तमुक्तं भवति॥ अन्यथादृष्टार्थत्वात्
अथाचमननिमित्तानि॥ तत्रपैठीनसिः॥ उच्छिष्टरेतोविण्मूत्रं संस्पृश्योन्मज्याचम्यप्र

व ४

क ८२

19

यतोभवतित्रिःप्रक्षाल्यवतंदेशं॥आचमनप्रक्षालनयोरथैक्रमेणपाठक्रमवाधः॥मनुः॥
वसाशुक्रमसृङ्मज्जामूत्रंविट्कर्णविण्नखाः श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः
वौधायनः॥आददीतमृदोऽपश्चषट्सुपूर्वेषुशुद्धये॥उत्तरेषुचषट्स्वद्भिःकेवलाभिर्विशु
ध्यति॥अत्रप्रक्षालनोत्तरमाचमनं॥तथाचदेवलः॥उच्छिष्टंमानवंस्पृष्ट्वाभोज्यंवापित
थाविधं॥तथैवहस्तौपादौचप्रक्षाल्याचम्यशुध्यति॥यदंभःशौचनिर्मुक्तंक्षितिंप्राप्यविन
श्यति॥प्रक्षाल्याशुचिलिप्तंचसंस्पृश्याचम्यशुध्यति॥यदंभइत्यादिशौचजलाईभूभा

स्प

गंसंस्पृश्यमलाद्यशुचिलिप्तंचप्रक्षाल्याचम्यशुध्यतीत्यर्थः॥वौधायनः॥निवींविस्रंस्यपरि
धायोपस्पृशेत्॥आपस्तम्बः॥स्वप्नेक्षवथौशिंघाणिकापाश्चाश्रुतालंभेलोहितस्यकेशा
नामग्नेर्गवांब्राह्मणस्यस्त्रियाश्चालंभेमहापथंगत्वामेध्यंचोपस्पृश्याप्रयतंचमनुष्यंनीवींप

श्रा०
१०

रिक्षायउपस्पृशेत्॥ श्रवयोर्दक्षिणयोः॥ सिंहातिकया श्रक्षुराश्वस्पर्शे॥ तथारिक्तपाणिर्वृषयस्तु
उपस्थायउपस्पृशेत्॥ रिक्तपाणिः शून्यहस्तः॥ वपसेपक्षिरोउद्यम्यपाणिमितिशेषः॥ विष्णुः
पंचनखाः स्थितिः हलेहस्य स्पृष्ट्वाचामेत्॥ चांडालम्लेच्छसंभाषणेच॥ हारीतः॥ स्त्रीशूद्रोच्छिष्टाभि
भाषणे मूत्रपुरीषोत्सर्गे दर्शने वदेवतामभिगन्तुकाम आचामेत्॥ तथा॥ रथ्यामाक्रम्यस्तु
षुप्सुः॥ तथा जालानुवर्त्तो नोत्तरेदनुस्पृश्य॥ यमः॥ उत्तीर्य्योदकमाचम्यावतीर्य्योपस्पृशेत्ततः
एवं स्याछ्रेयसा युक्तो वरुणश्चापि पूजितः॥ मन्वंगिरोवृहस्पतयः॥ सुप्त्वा सुत्वाच भुक्त्वाच नि
ष्ठीव्योक्त्वानृतं वचः॥ पीत्वापोध्येष्यमाणश्च आचामेत्प्रयतोपिसन्॥ ब्रह्मपुराणे॥ अधर्म
णोस्यसंलापे शुष्टे वा दन्तधावने॥ आचम्य प्रयतो भूत्वा ततः शुद्धो भवेन्नरः॥ अधवर्णास्य चा
चाराडालादेः॥ वायुपुराणे॥ निष्ठीविते तथाभ्यंगे तथा पादावच॥ विना यज्ञोपवीतेन

(२)

नित्यमेवमुपस्पृशेत्॥ उच्छिष्टस्यापि संस्पर्शे दर्शने चान्त्यजन्मनाम्॥ सर्वेष्वाचमननिमित्तेषु
विनायज्ञोपवीते नेति॥ यज्ञोपवीतमोचनमाचमननिमित्तमुक्तं॥ अत्र स्नानमध्यपतितान्या
चमननिमित्तान्यग्रे वक्ष्यामः॥ अथ द्विराचमननिमित्तानि॥ तत्र याज्ञवल्क्यः॥ स्नात्वा सुते
सुप्ते भुक्त्वा रथ्योपसर्पणे॥ आचान्तः पुनराचामेद्वासो विपरिधाय च॥ पैठीनसिः॥ कलिं
कास्तश्वासाश्रुमि रथ्या चत्ववेश्मरमशानान्तिःक्रम्याचांतः पुनराचामेत॥ कलिंक
टिनश्लेष्मा स्वासोऽत्रविक्लृत॥ अन्यस्य सदातनत्वात्॥ यमः॥ सकृदेमे तु वर्षासु प्रविश्याग्रा
मसंकरम्॥ जं भ्यां मृत्तिकास्तिस्त्रः पभ्यां तु शुद्धिगुणाः स्मृताः॥ एतत्प्रक्षालनं रथ्याक्रमणे नै
मित्तिकाचमनात्प्राक्॥ वसिष्ठः॥ आचान्तः पुनराचामेद्वासो विपरिधाय च॥ उष्णेोदकस्य
स्पर्शे तु तथौस्यात्ताम नो कौमे॥ आपस्तम्बः॥ भोक्ष्यमाणस्तु प्रयतोपि द्विराचामेत

द्भिः परिमृज्जेत्॥ शंखलिखितौ॥ मूत्रपुरीषष्ठीवनादिषु भुक्त्वा वाक्याभिधाने च॥ पुनरु
पस्पृशेत्॥ भुक्तं पठ्यं॥ अत्र द्विराचमने पाणिपादप्रक्षालनं सकृदेव द्रष्टव्यं स्यात्॥ आस्य
मार्ज्जनं पुनरावर्त्तते॥ दृष्टभेदात्॥ आस्यस्पर्शादिकमप्यावर्त्तते॥ अदृष्टार्थत्वात्॥
आचान्तस्य पुनराचमनविधानात्साङ्गस्यैवावृत्तिः॥ अतएव त्रिरभ्यस्तमाचमनमा
वर्त्तते॥ तन्नुद्धिरित्यनेन त्रिरित्यस्य बाधः॥ अथाचमनानुकल्पः॥ तत्र मार्कण्डेयपुरा
णे॥ कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनं॥ कुर्वीतालंभनं वापि दक्षिणश्रवणस्य
च॥ यथाविभवतो ह्येतत्पूर्वाभावे ततः परं॥ अविद्यमाने पूर्वस्मिन्नुत्तरप्राप्तिरिष्यते॥
पराशरः॥ क्षुते निष्ठीविते चैव दन्तश्लिष्टेऽनृते तथा॥ पतितानां च संभाषे दक्षिणं श्रव
णं स्पृशेत्॥ वृद्धशातातपः॥ वातकर्म्मणि निष्ठीव्य दन्तश्लिष्टे तथानृते॥ पति

तानाचसंभावेदस्रिरां अवरां स्पृशेत्॥ अत्रबोधायनः॥ आर्द्रतरां गोमयं भूमिं चोप
स्पृशेत्॥ तत्रापस्तम्बः॥ आर्द्रं वा शकृदोषधिं वा भूमिं वा॥ शकृत् गोमयं॥ आचाच
मनापवादः॥ तत्रापस्तम्बः॥ न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सद्भिर्यावन्न हस्तेन
स्पृशति॥ वशिष्ठः॥ न श्मश्रुगतो लेपः अशुचितिति शेषः॥ गौतमः॥ दन्तश्लि
ष्टं तु दन्तवत्॥ अन्यजिह्वाभिमर्षणात्॥ प्राक्च्युतेरित्येके॥ च्युतेष्वास्राववद्
विद्यान्निगिरन्नेव तच्छुचिः॥ प्राक्च्युतेरित्येके इति जिह्वाश्लिष्टमपि दन्तल
ग्नं यदि न च्यवते॥ तदा शुचीत्यर्थः॥ तेनायमर्थः॥ दन्तलग्नं जिह्वाश्लिष्टमा
चमनाद्यापकर्षणीयं॥ यदि न च्यवते तदा दन्तलग्ने सत्यप्याचमनं न कर्तव्यम्॥
तथा च देवलः॥ भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत्॥ दन्तलग्नमसं

हार्य्यं लेपं मन्येत दन्तवत्॥ न तत्र बहुशः कुर्य्याद्यत्नमुद्धरणे पुनः॥ भवेदशौ
चमत्यर्थं तस्याविधा द्धरो कृते॥ च्युते रित्यादि॥ यदि दन्तलग्नमाचमनोत्तरं च्यव
ते तदा शास्त्रावबद्धत्वान्नावन्निगरन्नेव शुध्यति॥ तथा च वसिष्ठः॥ दन्तवद्दन्तलग्नेषु
यच्चाप्यन्तर्मुखे भवेत्॥ आचान्तस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः॥ यच्चापीति
दन्तच्युतमप्यन्नकणादि यत्॥ प्रमादादवशिष्टमाचमनोत्तरमुपलभ्यते॥ इतीपनि
गरन्नेव शुध्यतीत्यर्थः॥ शंखः॥ दन्तवद्दन्तलग्नेषु रसवर्ज्जम्॥ मनुः॥ नोच्छिष्टं प्र
कुर्वते मुख्या विप्रुषोऽङ्गं न यान्ति याः॥ अस्यार्थः॥ मुखगता जलबिन्दवो भूमिपतिताः
स्पृष्टा अपि शुचयः॥ अंगलग्नास्तु लोमद्वयमेकं दन्त समर्था आचमनहेतवः॥ त
था च पैठीनसिः॥ भूमिगता बिन्दवः परामृष्टाः पूता विप्रुषः शुद्धि लोमान्त्रिके नै

ष्याचमेत्॥ तथा स्पृशन्ति बिंदवः पादौ य आचमयतः परान्॥ भूमिगैस्ते समा ज्ञेया न तैरप्र
यतो भवेत्॥ अंगिरसो॥ मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च॥ नोच्छिष्टस्तु भवेद्विप्रो य
थात्रेर्वचनं तथा॥ अप्सु उच्छिष्टता निषेधात्॥ पीत्वा यद्गतिनैमित्तिकमाचमनं॥ प्रयतोपि
तिष्ठवराच्च॥ एवं पीत्वा पइत्याचमनविधिर्भयादस्त्वित्यपोशानविषये प्राणाहुतिसंनिक
र्षादिति विकतरुकारादीनां व्याख्यानमस्मदुक्तं॥ शातातपः॥ दन्तलग्ने फले मूले भक्ष्ये स्ने
हे तथैव च॥ ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः॥ फले कटु तिक्त कषाये जातीफला
दौ समाराधित्याहुः॥ भक्ष्ये कटु कषाये॥ तथा चात्र॥ लघुहारीतः॥ कषायकटुताम्बूले
भुक्तस्नेहानुपाने॥ मनुः॥ उच्छिष्टेन संस्पृष्टो द्रव्यहस्तः कथंचन॥ अनिधायैव द्रव्यमा
चान्तः शुचितामियात्॥ द्रव्यमन्नपानादि॥ व्यतिरिक्तं॥ तथा च बृहस्पतिः॥ प्र
चरंश्चान्नपानेषु यदोच्छिष्टमुपस्पृशेत्॥ भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः॥

आ० १२

अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि॥ कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति॥ शौचं तु
कुर्य्यात्प्रथमं पादौ प्रक्षाल्पयेत्ततः॥ उपस्पृश्य ततरभ्युक्ष्य गृहीतं शुचितामियात्॥ द्रव्य
हस्तो गृहीतद्रव्यः॥ द्रव्यं परं चासंकुचितमेव॥ कृत्वा मूत्रं पुरीषं च द्रव्यहस्तः कथंचन॥
भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथाविधि॥ तत्स्वं पोगात्तु पक्वान्नमुपस्पृश्य ततः शु
चिरित्यापस्तम्बवचनात्॥ प्रक्षाल्य पादौ निःक्षिप्य॥ आचम्याभ्युक्षणं पुनः॥ पुष्पादीनां
तृणादीनां प्रोक्षणं हविषां तपेति वायुपुराणवचनात्॥ निःक्षिप्य द्रव्यं भूमौ धृत्वेत्य
र्थः॥ अथ दन्तधावनम्॥ तत्र दक्षः॥ उषःकाले तु संप्राप्ते शौचं कृत्वा यथाविधि॥ ततः
स्नानं प्रकुर्वीत दन्तधावनपूर्वकं॥ उषःकालः संध्यातः पूर्वं प्राचीप्रकाशवान्॥ याज्ञवल्
क्यः॥ प्रातः संध्यामुपासीत दंतधावनपूर्विकां॥ अत्र स्नाने संध्यायां चदन्तधावस्याना
ङ्गत्वम्॥ मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः॥ तस्मात्पूर्वं प्रयत्नेन भक्षयेद्दंतधाव

नमितिवद्धृणातातयेनाचमनवत्स्वतंत्रस्यैव शुद्धिहेतुतयाभिधानात्॥ एवं दन्तान् प्रक्षाल्य
स्नायादिति छंदोगपरिशिष्टे पिकालार्थः संयोगः॥ छन्दोगपरिशिष्टं उत्थाय नेत्रे प्रक्षा
ल्य शुचिर्भूत्वा समाहितः॥ परिजप्य च मंत्रेण भक्षयेद्दन्तधावनम्॥ आयुर्बलं यशो वर्चः
प्रजाः पशुवसूनि च॥ ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते॥ शुचिर्भूत्वा चम्प्रत्यर्थः॥ मंत्रे
णायुर्बलमित्यादिना वक्ष्यमाणेन भक्षयेदिति दत्तवर्षणाभिप्रायं॥ तदुक्तं मंत्रैव॥ नारद
युक्तं वा स्यैयमष्टांगुलमपाटितं॥ सत्वचैन्तकाष्ठं स्यात्तदग्रेण प्रधावयेदिति॥ अत्र नर
सिंहपुराणे॥ प्रादेशमात्रमपि वा वस्त्रांगुलमथापि वा॥ विष्णुः॥ कनीन्यग्रसमस्थौल्यं सकु
र्चं द्वादशांगुलम्॥ प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम्॥ सकूर्चं चूर्णिताग्रं भुक्त्वा चेति
भोजनोत्तरं दन्तलग्ननिर्हरणार्थं दन्तधावनमित्यर्थः॥ भोजने दन्तलग्नानि निर्हृत्याचम
नं चरेदिति देवलवचनात्॥ एवं चात्र दन्तधावने कालादिनिषेधो नादर्त्तव्यः॥ सामर्थ्या

(२९)

२४

त॥ हस्तायुधानिबंधे तु मुक्ते इति पति विषयतया व्याख्यातम्॥ तथा॥ आघाढुरङ्मुखः प्राङ्मु
खो वा दन्तधावनका ष्ठं महाभारते॥ तथा॥ प्रक्षाल्य हस्तौ पादौ च मुखं च सुसमाहितः॥ दक्षि
णं बाहुमुद्धृत्य कृत्वा जान्वंतरं ततः॥ प्राङ्मुख स्वोपविश्य स्व भक्ष येद्दन्तधावनम्॥ दक्षिणं बा
हुमुद्धृत्य उपवीती भूतेत्यर्थः॥ विष्णुः॥ प्रक्षाल्य भंक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नतः॥ नर
सिंहपुराणे॥ तस्माच्छुक्रमथाद्द्याभक्षयेद्दन्तधावनं॥ खदिरश्च करञ्जश्च करंजश्च वट
स्तथा॥ तित्रि णीवेणुपक्षं च आम्रनिम्बौ तथैव च॥ अपामार्जश्च बिल्वश्च अर्कश्चौदुम्ब
रस्तथा॥ सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ अत्र विष्णुः + एते प्रशस्ताः कथिताः
दन्तधावनकर्मणि॥ दन्तकाष्ठस्य वक्ष्यामि समासेन प्रसस्ततां॥ + वटासनार्कः खदिरकरं
जकरवीरसर्ज्जारिमेदापामार्गमालतीककुभबिल्वानामन्यतमं कषायं कटु तिक्तं वा॥
असनः आसन इति प्रसिद्धः सर्ज्जः शालः॥ अरिमेदो विट्खदिरः

अत्रहारीतः ॥ बिल्वखदिराम्रपोलाशशिरीषापामार्गाणामेकतमं पोलाशः आम्रातकः ॥ त
था पालाशं कोविदारश्लेष्मातकतिल्वकशाकवृक्षनिर्गुण्डीशिखण्डीवेणु वर्ज्यम् ॥ तिल्व
कः वीलू इति प्रसिद्धः शिखण्डी मयूरशिखा ॥ वेणुनिषेधस्त्वग्नितरविषयः शा कवृक्षः ॥ स
गउन इति प्रसिद्धः प्लक्षमाषकरवीरकरंजशमीपिंशपा इत्येको दधिकपित्थहरीतक्याः स्वस्थ
शालामलकानि इत्यपरे ॥ एकेऽपरे तूत्तुभयत्र वर्ज्यमिति शेषः ॥ तथा ॥ नार्द्रं नाशुचि
नातिशुष्कं नातिस्थूलं नमयोपस्थितागतमनोंगं द्विनार्द्रमिति सपर्णं न निवृत्त्यपर्णम् ॥ विधिस्तु
पूर्वमीषदार्द्रस्य अपोस्थितागतम् ॥ अचूर्णितागतम् ॥ अनोष्ठगंधि ॥ उषस्पर्शिगंधिविहीनम् ॥
विस्तुः ॥ न श्लेष्मातकारिष्टविभीतकधवधन्वनजम् ॥ न कोविदारशमीपीलुपिप्पलेङ्गुदीगु
ग्गुलुजम् ॥ न बर्बूरनिर्गुण्डीशिग्रुतिलकतिंदुकजम् ॥ न पारिभद्राम्लिकामोचकशाल्मलीशण
राजम् ॥ न मधुरं नाम्लं नार्द्रं शुष्कं न शुषिरं न पूतिगंधि न पिच्छिलं ॥ धन्वनः ॥ धामनीयति प्रसि

दः॥ निर्गुराशिसिंदुवारः॥ महाभारते॥ र्वर्जयेत्सपत्रमश्वातम् ऊर्ध्वशुष्कं च पाटितम्॥ त्वग्विहीनं ग्रंथि
मुखं तथा पालाशध्वंशिंशपं॥ अजंबुवितस्तिमात्रं च कीटाग्निभिर्दूषितम्॥ अजुमित्यादि
ना विधिः॥ उपानाः॥ नांगुलीभिर्दंतान्प्रक्षालयेत्॥ अत्र च शौचार्थं दंतधावने विहितत्व
दिरादि द्रव्यविशेषाभावे सामान्यशास्त्रानुग्रहापेक्षं वै शक्तिन्यायात्॥ द्रव्यान्तरोपादान
प्रशान्तौ पालाशादिनिषेधाः सार्थकाः॥ अत्र महाभारते॥ पर्वस्वपि च वर्जयेत्॥ नर
सिंहपुराणे॥ प्रतिपद्दर्शषष्ठीषु नवम्यां चैव सत्तमाः॥ दन्तानां काष्ठसंयोगो दहत्यासप्तमं
कुलं॥ अभावे दंतकाष्ठानां प्रतिषिद्धदिने तथा॥ अपां द्वादशगंडूषैर्मुखशुद्धिर्विधीय
ते॥ अथ प्रातःस्नानादि॥ तत्र छंदोगपरिशिष्टे कात्यायनः॥ यथाहनि तथा प्रातः स्नाया
न्नित्यमनातुरः॥ दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत्॥ अल्पत्वाद्धोमकालस्य बहु
त्वात्स्नानोपकरणां॥ प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः॥ गेहइत्युद्धृतजलस्ना

तत्र४

नोपलक्षणं॥ न घाघमावविधानात्॥ विष्णुः॥ प्रातः स्नाप्यरुणाकरग्रस्तां प्राचीमवलोक्यस्ना
पात्॥ अरुणाकरग्रस्तामितिसंध्यापूर्वकालपरम्॥ संध्यायान्निषेधादितिहरिहरः॥ तद्युक्त
म्॥ संध्यापूर्वकालेपिरात्रित्वेन निषेधात्॥ तस्मादरुकरग्रस्तामित्यसंकुचितमेव॥ अत
एवसंध्यास्नान कीर्त्तनम्॥ अत्र च॥ उदयात्प्राक् प्रातः स्नान विधानात्॥ सूर्योदयं विनानै
वस्नानदानादिकाः क्रियाइति मार्कंडेयपुराणमितरविषयम्॥ तथा॥ अलक्ष्मीकालक
र्णीचदुःस्वप्नं दुर्विचिंतितम्॥ अम्मात्रेणाभिषिक्तस्यनश्यन्तइतिधारणा॥ कालकर्णीरक्ष
सी॥ अम्मात्रेणेतिमंत्रादिकं विनापीत्यर्थः॥ धारणानिश्चयः॥ दक्षः॥ प्रातः स्नानंप्रशंस
न्तिदृष्टादृष्टकरं हितत्॥ सर्वमर्हतिपूतात्माप्रातः स्नायीजपादिकम्॥ दृष्टंकर्माधिकारः
अदृष्टं जपादिद्वारा परलोकसिद्धिः॥ एतच्चसर्वमर्हतिइत्यनेनैववक्ष्यम्॥ अदृष्टं पापक्षय
इतिकेचित्॥ नरसिंहपुराणे॥ पूर्वांसंध्यांसनक्षत्रामुपासीतयथाविधि॥ गायत्रीमभ्यसेत्ता

आ०
१६

वप्यावहारित्वदर्शनात्॥ अनुदितहोमांतरविषमेतत्॥ दक्षः॥ संध्याकर्म्मावसानेतु स्वयं
होमोविधीयते॥ तत्रानुकल्पमाह॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः॥ एतैरे
वहुतंयत्तुतद्धुतंस्वयमेवहि॥ विट्पतिर्जामाता॥ वाराहपुराणे॥ उदयान्तिःस्तंसूर्य्यंयस्तु
भक्त्यानरोद्विजः॥ द्ध्वस्तताज्ज्वालिभिस्तुतिहभिः पूजयेद्बुधिः॥ तस्यभावप्रपन्नस्या
शुभंयत्स्यमुपार्जितम्॥ तत्सेरणादेवनिर्दग्धंभस्मीभवतितस्यतत्॥ मनुः॥ मैत्र
प्रसाधनंस्नानंदन्तधावनमंजनम्॥ पूर्वाह्ण एवकुर्वीतदेवतानांचपूजनम्॥
पूर्वाह्ण एवेतिपुरीषोत्सर्गेतसतिसंभवनियमः॥ केशप्रसाधनेचोत्सवादिनि
मित्ताभावे॥ दन्तधावनेभोजनोत्तरविहितेतरे॥ अंजनेभेषजेतरेक्षौरीराज्ज
नादौ॥ स्नानेदेवपूजनेमध्याह्नादिविहितेतरे॥ विष्णुपुराणे॥ आचान्तस्त्वत

33

श्रा०
१६

वप्यावदादित्यदर्शनात्॥ अनुदितहोमांतरविषमेतत्॥ दक्षः॥ संध्याकर्म्मावसानेतु स्वयं
होमोविधीयते॥ तत्रानुकल्पमाह॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः॥ एतैरे
वहुतंयत्तुतद्धुतंस्वयमेवहि॥ विट्पतिर्ज्जामाता॥ वाराहपुराणे॥ उदयान्तिःस्तंसूर्य्यस्तु
मत्स्यानगोद्विजः॥ दध्यक्षताञ्जलिभिस्तुतिस्तुभिःपूजयेच्छुचिः॥ तस्यभावप्रपन्नस्या
शुभंयत्तसमुपार्जितम्॥ तत्सर्वंनाशमायाति नीरजस्तमसीभवतितस्यतत्॥ मनुः॥ मैत्रं
प्रसाधनंस्नानंदन्तधावनमंजनम्॥ पूर्वाह्नएवकुर्वीतदेवतानांचपूजनम्॥
पूर्वाह्नएवेतिपुरीषोत्सर्गेसतिसंभवनियमः॥ केशप्रसाधनेचोत्सवादिनि
मित्ताभावे॥ दन्तधावनेभोजनोत्तरविहितेतरे॥ अंजनेभेषजेतरेसौवीराञ्ज
नादौ॥ स्नानेदेवपूजनेमध्याह्नादिविहितेतरे॥ विष्णुपुराणे॥ आचान्तश्चत

ततः कुर्य्यात्पुमान्लोके प्राप्तप्रसाधनम्॥ आदर्शाञ्जनमंगल्यदूर्वाघालंभनानि च॥ छंदोगप
रिशिष्टे॥ श्रोत्रियं सुभगां गां च अग्निमग्निचितं तथा॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स विमु
च्यते॥ तथा॥ पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम्॥ प्रातरुत्थाय यः पश्येत्स कले
पलक्षणम्॥ अष्टभागं दिनं विभज्य प्रथमभागकृत्यं दर्शः॥ देवकार्य्यं ततः कृत्वा गुरुमंग
लवीक्षणम्॥ गुरुः पित्रादिः॥ मंगलं श्रोत्रियादिः॥ मनुः॥ देवतामभिगच्छेत्तु धार्म्मिकां
श्च द्विजोत्तमान्॥ ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु॥ छागलेयोयमोपि द्वितीये॥ पतीनां
दर्शनं चैव स्पर्शनं भाषणं तथा॥ कुर्वाणाः पूयते नित्यं तस्मात्पश्येत्तु नित्यशः॥ अग्नि
चित्कपिला सत्री राजा भिक्षुर्महोदधिः॥ दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः॥
सत्री अन्नादिसत्रशीलः कृतसत्रयाग इत्येके॥ भिक्षुर्यतिः॥ महाभारते॥ यज्वामि

२

35

आ०
१७

घान्तरः सत्रीशतायुर्द्धर्म्मिकः स्तुविः॥ स्नानसिद्धांस्तपःसिद्धान् दृष्ट्वा पापात्प्रमुच्यते॥ ब्रा २
पुराणे॥ ब्राह्मणं वामनं दृष्ट्वा वराहं च जलोत्थितम्॥ नमस्येद्वैव यो भक्त्या स पापेभ्यः प्रमुच्य
ते॥ ब्रह्मपुराणे॥ स्वमात्मानं घृते पश्ये यदीच्छेच्चिरजीवितं॥ आत्मानं शरीरं॥ नारदः॥ लो
केस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः॥ हिरण्यं सर्प्पिरादित्य आपो राजा तथाष्टमं॥
एतानि सततं पश्येन्नमस्येच्चार्च्चयेच्च यः॥ प्रदक्षिणं च कुर्वीत तथास्यायुर्न्न हीयते॥ वाम
नपुराणे॥ कृत्वा शिरः स्नानमथान्हिकं च संपूज्य तोयेन पितृन्सदेवान्॥ होमं च कृत्वा
लभनं शुभानां ततो वहिर्न्निर्गमनं प्रशस्तं॥ पूर्व्वो दधिसर्प्पिरथोदकुंभं धेनुं सवत्सां वृषभं सु
वर्णं॥ मृद्गोमयं स्वस्तिकमक्षतानि लाजान्मधु ब्राह्मणकन्यकां च॥ श्वेतानि पुष्पाणि
तथा शमीं च हुताशनं चन्दनमर्क्कविम्बम्॥ अश्वत्थवृक्षं च समालभेत ततस्तु कुर्य्यान्निजजा

38

तिधर्म्मा॥ देशानुशिष्टं कुलधर्म्ममग्र्यं स्वगोत्रधर्म्मं नहि संत्यजेच्च॥ आन्हिकमहःस्नानं॥ इत

वाभ्युदयादौ॥ अरुणविचारे स्नानं मध्यान्हात्प्राग्विशेषत इति वशिष्ठवचनात्॥ परि त्वान्हिकं स

महः कृत्यमुच्यते तत्रासंपूज्येत्यादि व्यर्थं स्यात्॥ संपूज्यतो येनेतितत्परापरम्॥ आरंभनं स

पूर्णं॥ शुभानां वस्यमाणा दूर्वादीनां स्वस्तिकोभवनमेदः॥ अर्क्कबिम्बसमालभनं वीक्षणाप

प्यवसितम॥ दस्तः॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥ वेदस्वीकरणं पूर्वं विचारोभ्यसनं

जपः॥ तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा॥ समित्पुष्पकुशादीनां सकालः समुदाहृतः

स्वीकरणमध्ययनम्॥ एतच्च ब्रह्मचारिणः॥ गृहस्थस्याप्यनधीतभागे॥ तथा चापस्तम्बः॥ य

पाविद्यानामविरोधेन तां पुनराचार्यमुपेत्य साधयेदिति॥ याज्ञवल्क्यः॥ वेदार्थानधिगच्छेच्च शा

स्त्राणि विविधानि च॥ यमः॥ दानेन तपसा यज्ञैरुपवासव्रतैस्तथा॥ न तां गतिमवाप्नोति विद्यया

यामवाप्नुयात्॥ विद्यया ब्रह्मविद्येति व्याख्यानमशुद्धम्॥ सहस्रानुक्रमेणाभिधानात्॥ द

आ०
१८

क्षः॥ तृतीये च तथा भागे पोष्यवर्गार्थसाधनम्॥ गौतमः॥ योगक्षेमार्थमीश्वरमधिगच्छे
त्॥ अथ स्नानविधिः॥ तत्र दक्षः॥ चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्॥ शुचौ देशे प्रो
तु सा ग्राह्या शर्कराश्मादिवर्जिता रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता॥ न मृ
दं नोदकं वापि न निशायां तु गोमयम्॥ न गोमूत्रं प्रदोषे तु गृह्णीयान्नरः॥ निशाया
मिति न मृदं नोदकमित्यत्रापि सम्बध्यते॥ तथा॥ वल्मीकाखूत्करात्रैवाप्यजला
च्च पथिवृक्षयोः॥ कृतशौचावशिष्टाश्च न ग्राह्याः सप्त मृत्तिकाः॥ आखूत्करो मूषको
कीर्णा मृत्तिकास्थानं॥ लेपः कुड्यादीनाम्॥ दक्षः॥ मृत्तिकाः सप्त न ग्राह्या वल्मीके
मूषकोत्करे॥ अन्तर्जले श्मशाने च वृक्षमूले सुरालये॥ परस्नानावशिष्टा वर्जनीय
स्काभैः सदा बुधैः॥ व्यासः॥ स्नानं मध्यंदिने कुर्यात्सुजीर्णेऽन्ने निरामयः॥ एवं च स्व

य

ल० २

आ०
१८

स्रः॥ तृतीये च तथा भागे पोष्यवर्गार्थसाधनम्॥ गौतमः॥ योगक्षेमार्थमीश्वरमधिगच्छे
त्॥ अथ स्नानविधिः॥ तत्र दक्षः॥ चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्॥ शुचौ देशे
तु संग्राह्या शर्कराश्मादिवर्जिता रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता॥ न मृ
दं नोदकं वापि न निशायां तु गोमयम्॥ न गोमूत्रं प्रदोषे तु गृह्णीयान्नरः॥ निशाया
मि तिन मृदं नोदकमित्यत्रापि सम्बध्यते॥ तथा॥ वल्मीकाखूत्कारान्तर्जला
त्पथि वृक्षयोः॥ कृतशौचावशिष्टाश्च न ग्राह्याः सप्त मृत्तिकाः॥ आखूत्करो मूषको
त्कीर्णा मृत्तिका स्थानं॥ लेपः कुड्यादीनाम्॥ दक्षः॥ मृत्तिकाः सप्त न ग्राह्या वल्मीके
मूषकोत्करे॥ अन्तर्जले श्मशाने च वृक्षमूले सुरालये॥ परस्नानावशिष्टा वश्रेय
स्कामैः सदा बुधैः॥ व्यासः॥ स्नानं मध्यंदिने कुर्यात्सुजीर्णेन्ने निरामयः॥ स्वं च वस्त्र

ल्क २

५

प्रमध्ययनं स्नानमुत्सारं भोजनं कृतिम्॥ उभयोः संध्ययोर्न्नित्यं मध्याह्ने चैव वर्ज्जयेदिति देवलोपि
निषेधो रागप्राप्तस्नाने मध्याह्ने त्राभिजिद्वेला॥ पंचमभागे भोजनस्यैवस्यमाणत्वात्॥ योगिया
ज्ञवल्क्यः॥ उभे संध्ये च स्नातव्यं ब्राह्मणैश्च गृहाश्रितैः॥ तिसृष्वपि च संध्यासु स्नातव्यं च तपस्विना
उभे संध्ये प्रातर्म्मध्याह्ने च॥ तपस्विना वनस्थेन यतिना च॥ बौधायनः॥ अप्स्वेवावगाहनैर्विहितं सा
र्ववर्णिकम्॥ विष्णुः॥ उद्धृताद्भूमिष्ठमुदकं पुण्यं पयस्यावरात्प्रस्रवत्तस्मान्नादेयं तस्मादपि साधुगत
तं सर्वत एव गांगं॥ शंखः॥ अद्भिर्गात्राणि शुध्यंति तीर्थस्नानान्महत्फलं॥ मनुः॥ नदीषु देवतखा
तेषु सरःसु च॥ स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥ देवखातेषु सूर्य्यादिसमीपखातेषु॥
प्रस्रवणेषु निर्झरेषु॥ नित्यमित्युक्तेर्जीवनवदधिकारः॥ सवस्त्रो हरहरा प्लुवेतेति संख्यापनग्र
हात्॥ अथातो नित्यस्नानैमित्तिकस्नापनाब्द॥ एवं च निस्नाने नद्यादीनामङ्गत्वम्॥ त्रिरात्र

स्नानं ४

खातेषु

(४१)

प्रमध्ययनं स्नानमुच्चारंभोजनं कृतिम्॥ उभयोः संध्ययोर्न्नित्यं मध्याह्ने च विवर्ज्जयेदिति देवलीये
निषेधो रागप्राप्तस्नाने मध्याह्ने। इत्राभिजिद्वेला॥ पंचमभागे भोजनस्य पूर्वस्य मा रात्वावत्॥ योगिया
ज्ञवल्क्यः॥ उभे संध्ये च स्नातव्यं ब्राह्मणैर्गृहमाश्रितैः॥ तिसृष्वपि च संध्यासु स्नातव्यं व्रतपस्विना
उभे संध्ये प्रातर्मध्याह्ने च॥ तपस्विना वनस्थेन यतिना च॥ बौधायनः॥ अम्भोवगाहनं विहितं सा
र्ववर्णिकम्॥ विष्णुः॥ उद्धृताद्भूमिष्ठमुदकं पुण्यं स्थावरात्प्रस्रवत्तस्मान्नादेयं तस्मादपि साधुगृही
तं सर्वत एव गांगं॥ शंखः॥ अद्भिर्गात्राणि शुद्ध्यंति तीर्थस्नानाद्भवेत्फलं॥ मनुः॥ नदीषु देवतडा
गेषु सरःसु च॥ स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥ देवखातेषु सूर्य्यादि समीपखातेषु॥
प्रस्रवणेषु निर्झरेषु॥ नित्यमित्युक्ते जीवनवदधिकारः॥ सर्वस्त्रीहरहराप्लुवेतेति संख्यापनग्र
हात्॥ अथातो नित्यस्नानं नैमित्तिकाम्यापनाद्य॥ एवं च नित्यस्नाने नद्यादीनामङ्गत्वम्॥ त्रिरात्र

स्नानं ४

खातेषु

५०

फलदानघटत्यादिनित्यस्नानप्रकरणस्थवचनाद्गुणफलतापि॥ प्रकरणान्तरोक्ततीर्थस्ना
नंस्वर्गादिफलदंसंधिकरमेवेति॥ छन्दोगपरिशिष्टे॥ धनुःसहस्राण्यष्टौचगतिर्य्यासांनविद्य
ते॥ नतानदीशब्दवहागर्त्तास्ताःपरिकीर्त्तिताः॥ धनुर्हस्तचतुष्कं॥ तथा॥ पर्य्युषंस्रावणादि
सर्व्वानघोरजस्वलाः॥ तासुस्नानंनकुर्व्वीतवर्जयित्वासमुद्रगाः॥ याःशोषमुपगच्छंतिग्री
ष्मेकुनदिकाभुवि॥ तासुस्नानंनकुर्व्वीतप्रावृष्यम्बुदर्शने॥ उपाकर्म्मणिचोत्सर्गेप्रेतस्नाने
तथैवच॥ चंद्रसूर्य्यग्रहेचैवरजोदोषोनविद्यते॥ यद्योमासः॥ मनुः॥ नस्नानमाचरेद्भुक्त्वाना
तुरोनमहानिशि॥ नवासोभिःसहाजस्त्रंनाविज्ञातेजलाशये॥ नभुक्त्वामहानिशिइत्यादिक
निषेधश्चाण्डालादिस्पर्शनिमित्तकस्नानेनास्ति॥ नाप्रपतःस्नानमपितिष्ठेदितिवाधनात्॥
महानिशिरात्रिप्रहरद्वयं॥ नातुरइतिरोगस्यस्नानसंवर्द्धनीयत्वेनदृष्टार्थत्वात्॥ अविज्ञाते

गध्धतयानक्राद्दिरहितयाच॥ह्मत्रिमे प्रतिष्ठितत्वाप्रतिष्ठितत्वाभ्यामपि॥देवलः॥राहुद
र्शसंक्रांतिविवाहात्ययवृद्धिषु॥स्नानदानादिकंकुर्य्यान्निशिकाम्यव्रतेषुच॥अत्य
गोमृतकम्॥वृद्धिपुत्रजन्मादिः॥वामनपुराणे॥स्नायाच्छिरस्स्नानतयानऽनित्यंनाऽका
रांचैवसदानिशासु॥ग्रहोपरागस्वजनात्तिपातंमुक्त्वावजन्मर्क्षगतंशशांकम्॥शिरः
स्नानतयाशिरोनैकार्य्यं॥वैधन्तुनित्यस्नानंकर्त्तव्यमेव॥अकारणमित्यनेनरागप्रयुक्तज
लक्रीडादिव्यावृत्तिः॥आपस्तम्बः॥सशिरोऽवमज्जनमप्सुवर्ज्जयेदस्तमितेचस्नानं॥सशि
रोऽवमज्जनंशिरोनैकार्य्यंस्नानं॥हरिहरेण॥अशिरोऽवमज्जनमितिपठितम्॥गात्र
प्रक्षालनमात्रंजलप्रविश्यकर्त्तव्यमितिचव्याख्यातम्॥अत्रचास्तमितमात्रेस्नान
निषेधात्॥मनो॥नमहातिशीतिदोषातिशापार्थ्यं॥दृष्टा र्थम्वा॥अत्रविष्णुः॥नसंध्यापं

(५२)

।गप्राप्तस्नाननिषेधोयंवैधस्यसंध्यायांविधानात् ॥ हारीतः ॥ नचत्वरोपधास्योः स्नापात्
।शंखलिखितौ ॥ ननग्नः ॥ स्नायात् ॥ अत्रनग्नस्नाननिषेधात् ॥ पूर्ववनवासोभिरितिव
त्रवहुत्वनिषेधात् ॥ एकवासस्त्वं ॥ द्विवासस्त्वंचनस्नानविरोधिनार्द्धमेकंचवसीतेतिपु
घार्थत्वान्नस्नानविधौदोषमावहेत् ॥ अथवा ॥ होमदेवार्चनाद्यासुक्रियास्वाचमनेतथा
ोकवस्त्रः प्रवर्त्तेत द्विजवाचनिके जपइति ॥ विष्णुपुराणे ॥ एकवस्त्रतानिषेधात् ॥ द्विवस्त्र
तानियमएव ॥ अत्रव्यासः ॥ नभुक्त्वान्नंक्तनोरोगी ॥ शंखलिखितौ ॥ अमेध्योदकंपरिहरेत्
नद्या ॥ नसमुद्रोदकमवगाहेत ॥ योगियाज्ञवल्क्यः ॥ प्रभूतेविद्यमानेतुविमलेसुमनोहरे
॥ नाल्पोदकेद्विजः स्नायान्नदीचोत्सृज्यकृत्रिमे ॥ विष्णुः ॥ परनिपानेषु ॥ नस्नानमाचरे
त् ॥ आचरेद्वापंचपिण्डाननुद्धृत्यापदि ॥ परनिपातेषु ॥ परकृततडागप्रायेषु निपानकर्तुः स्ना
वाहिदुःकृतांशेनलिप्यतइतिमनुस्मरणात् ॥ पंचपिण्डानीति सेतुकूपव्यतिक्तजला

ति॰४

राम॰

२०

दि॰१

43

ता१

ष्णायेत्॥ निरुद्धासु च मृत्पिण्डान् कूपात्तु त्रीन् समुद्धरेत् तथेति बोधायनदर्शनात्॥ तथा निरुद्धासु च न
स्नायादंशभाक् तत्र सेतुकृत्॥ अत्र प्राचः॥ अप्रतिष्ठितमात्रे तु परिग्रहोद्धारः॥ तस्यैव परकी-
यत्वादित्याहुः॥ तन्नेति हरिहरादयः॥ अप्रतिष्ठितजलत्वेन तत्र स्नानाभावात्॥ परस्यापि प्रयोगे
चौर्यापत्तेः॥ मन्वादेः परकृतस्वरूपस्य परकीयत्वावगमाच्च॥ योगियाज्ञवल्क्यः॥ अगम्याद्या आ-
गता॥ आपो नद्याः प्रथमवेगिकाः॥ पक्षोभिता स्वकेनापि यावच्छतीर्थाद्विनिःसृताः॥ गंगादिप्रवाह-
विच्छिन्नाः॥ तथा॥ पादेन पाणिना वापि पयः स्नावस्त्रेणचोदकम्॥ न हन्यान्नावगाहेच्च न च प्रक्षो-
भयेद्बुधः॥ शंखलिखितौ॥ नाप्सु मेहेन नोद्धर्षणं कुर्यात्॥ उद्धर्षणं गात्रमलप्रक्षालनम्॥ बौ-
धायनः॥ आपो देवगृहं गोष्ठं यत्र सन्ति च ब्राह्मणाः॥ अप्रक्षाल्य पादौ नान्तः प्रवेष्टव्यम्॥ देव-
लः॥ न नदीषु नदीं ब्रूयात् पर्वतेषु च पर्वतम्॥ नान्यत्र प्रशंसेत्तत्रस्थस्तीर्थस्थापनेषु च॥ अ-
ङ्गिराः॥ विना दर्भैस्तु यत्स्नानं यच्च दानं विनोदकम्॥ असंख्यातं च यज्जप्तं तत्सर्वं निष्फलं भवेत्॥

55

हारीतः॥ नस्नानवर्णायोरग्नंप्रपद्येदन्यत्रदेवगुरुब्राह्मणेभ्यः॥ जावालिः॥ त्रयोदश्यां तृतीयायां
दशम्यां च विशेषतः॥ अदूविद्स्त्रियाः स्नानं नाचरेयुः कथंचन॥ यथासंख्यमत्र॥ अथापस्वः
अस्पृश्यस्पर्शने वान्ते अश्रुपाते क्षुरे भगे॥ स्नानं नैमित्तिकं कार्यं दैवपित्र्यविवर्जितं॥ दैवपि-
त्र्यविवर्जितमिति॥ नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते॥ तर्पणं तु भवेत्तस्य अंगत्वे
परिकीर्तितमिति ब्रह्मपुराणवाक्यात्॥ समान्यतः॥ प्रसक्तस्य तर्पणस्य व्यावृत्तिः॥ यमः॥ अ-
जीर्णेऽभ्युदिते वान्ते श्मश्रुकर्मणि मैथुने॥ दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते॥ अ-
भ्युदितेऽशुद्धोऽजीर्णादिना अभ्यक्ते॥ एतच्चोत्तरकालस्नानप्राप्त्यर्थम्॥ अजीर्णावस्थायां नि-
षेधात्॥ अभ्युदिते वान्त इति सम्बन्धे पर्युषिते वान्त इति शेषः॥ दुर्जनोऽत्र चाण्डालादिः॥
मात्रपदेन सर्वांगनिवृत्तिः॥ तस्मादपापत्यनिमित्तके स्नाने मज्जनमात्रेण शुद्धिः॥ गौत-
मः॥ पतितचाण्डालसूतिकोदक्याशवस्पृष्टिं तत्स्पृष्टयुपस्पर्शने सचेलउदकोपस्पर्शना

स्ना०२

राम०

२१

४६

शुद्धो भवति। अत्र शावस्पर्शिनस्तत्स्पर्शिनश्च स्पर्शे स्नानविधानात्॥ उपस्पृश्याशुचिस्पृष्टं तती
यं वापि मानवः॥ हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यतीति देवलवचनम्॥ पतितादिस्पृ
ष्टिस्पर्शे संकोचनीयं॥ तत्स्पृष्टिपदं पतितादिस्पर्शिनोप्याहेति केचित्॥ तदयुक्तं द्वंद्वयो
गौरवात्॥ एकद्वंद्वे च संनिहितं परत्वमेव भेदः। उदक्यास्पर्शने स्नानं॥ बौधायनः॥ चाण्डा
लेन सहाध्वगमने सचैलं स्नानं॥ पराशरः॥ चैत्यवृक्षश्चितिर्यूपश्चाण्डालः सोमविक्रयी
। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत्॥ सचेलोऽप्यस्त्रधारी स्पृष्टस्तत्सहितः स्पृ
ष्टः॥ जलमाविशेदिति॥ बाहुराः स्नानोपलक्षणाम्॥ तथा॥ श्वकाकैरवलीढस्य नखैर्विद्द
लितस्य च॥ अद्भिः प्रक्षालनं शौचमग्निना चोपचूडनं॥ इयं च स्नानं विनैव शुद्धिः॥ शिरोव्य
तिरिक्तगात्रोपघाते॥ उपचूडनं ज्वालया स्पर्शनं॥ च्यवनः॥ श्वानं श्वपाकं प्रेतधूमं देवद्र

शुद्धो भवति। अत्र शावस्पर्शिनस्तत्स्पर्शिनश्च स्पर्शे स्नानविधानात्॥ उपस्पृश्य पाशुचिस्पृष्टं तृतीयं वापि मानवः॥ हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यतीति देवलवचनम्॥ पतितादिस्पर्शिस्पर्शे संकोचनीयं॥ तत्स्पृष्टिपदं पतितादिस्पर्शिनोप्याहेति केचित्॥ तदयुक्तं द्वंद्वदयोगौवरवात्॥ एकद्वंद्वे च संनिहितं परत्वमेव भेदः॥ उदक्यास्पर्शनं स्नानं॥ बौधायनः॥ चाण्डालेन सह संगमने सचेलं स्नानं॥ पराशरः॥ चैत्यवृक्षश्चितिर्यूपश्चाण्डालः सोमविक्रयी॥ एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलो जलमाविशेत्॥ सचेलोपि सूत्रधारी स्पृष्टस्तत्सहित इत्यर्थः॥ जलमाविशेदिति॥ बाहुणा स्नानोपलक्षणम्॥ तथा॥ श्वकाकैरवलीढस्य नखैर्विदलितस्य च॥ अद्भिः प्रक्षालनं शौचमग्निनाचोपचूडनं॥ इयं च स्नानं विनैव शुद्धिः॥ शिरोव्यतिरिक्तगात्रोपघाते॥ उपचूडनं ज्वालयास्पर्शनं॥ च्यवनः॥ श्वानं श्वपाकं प्रेतधूमं देवद्र

व्योपजीविनं ग्रामयाजकं यूपं चितिं काष्ठं मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृष्टं रज
स्वलां महापातकिनं शवं स्पृष्ट्वा सचेलमंभोऽवगाह्योत्तीर्याग्निमुपस्पृशेत्॥गायत्र्य
ष्टशतं जपेत्॥घृतं प्राश्य॥पुनः स्नात्वा त्रिराचमेत्॥अग्निस्पर्शनादिकाः संस्कारकृते
स्पृष्टेऽपत्तेरेस्मिन्मात्रविधानात्॥आपस्तम्बः॥एकशाखां समारूढश्चाण्डालादिर्यदा भ
वेत्॥ब्राह्मणास्तत्रवासीनः स्नानेन शुचितामियात्॥कालिकापुराणे॥व्यासः॥भा
सवानरमार्जारखरोष्ट्राणां शुनां तथा॥शूकराणाममेध्यं च स्पृष्ट्वा स्नायात्सचेलकं
लघुहारीतः॥श्वविष्ठां काकविष्ठां वा कंकगृध्रनरस्य च॥अधोच्छिष्टस्तु संस्पृश्य सचेलो जल
माविशेत्॥अधोच्छिष्टः मूत्राद्युत्सर्जेनाशुचिः॥देवरः मानुषास्थि वसां विष्ठामार्त्तवं मूत्र
रेतसी मज्जानं शोणितं चापि परस्य यदि संस्पृशेत्॥स्नात्वा प्रमृज्य लेपादीनाचम्य च शु

चिर्भवेत्॥ तान्येववस्त्राणि संस्पृश्य पूतः स्यात्परिमार्जनात्॥ परिमार्जनात्· क्षालनात्· तदनन्तर
माचमनं प्राप्तमेव:॥ विष्णुः॥ नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः सुराभिर्म्मद्यैर्वोपहतो मृतो
येस्तदंगं प्रक्षाल्याचांतः शुद्धो भवति अन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नानेन शुद्धो भवति
चक्षुषुपहतस्तु॥ उपोष्य स्नात्वा पंचगव्येन शुध्यति॥ दशनच्छदोपहतश्च॥ प्रबाहुः हस्तः
अतन्द्रिः स्यादाचमनं प्राप्तमर्थम्॥ अन्यत्रोपहतः उक्तेतरकायेस्पृष्टः॥ अंगिराः॥ इन्द्रिये
षु प्रतिष्ठं स्यादमेध्यं पादे कर्हिचित्॥ मुखेऽपि संस्पृष्टांगतं तत्र स्नानं विशोधनं॥ शंखः॥
रथ्याकर्दमतोयेन ष्ठीवनाद्येन चाप्यथ॥ नाभेरूर्द्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति॥
ब्रह्मपुराणे॥ उच्छिष्टेनाथ विप्रेण विप्रः स्पृष्टस्तु तादृशः॥ उभौ स्नानं प्रकुरुतः॥ सद्यए
व समाहितौ॥ तथा मानुषास्थि तु संस्पृश्य परगंध सस्नेहमेव च॥ स्नायाज्ञो संस्पृशोत्स्पर्शप
वृपद्धि सुमनुस्मरेत्॥ दग्धस्पर्शे कामकृते स्नानम्॥ आचम्यैव तु निःस्नेहमिति मनुवच

द्वा० २

49

नात्॥ मनुः॥ वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्॥ आचामेदेव भुक्त्वान्नं स्नानं मै-
थुनिनः स्मृतं॥ भुक्त्वान्नवान्तस्य स्पर्शः॥ तेन सद्यो वमने आचमनमात्रं॥ एककारेणास्नान-
व्यावृत्तेः॥ मैथुनिनः॥ ऋतावितिशेषः॥ बृहस्पतिः॥ पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा तु
कामतः॥ स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥ मनुः॥ अनुगम्येच्छया प्रेतं ज्ञा-
तिमेव वा॥ स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति शुध्यदित्यनुवृत्तौ॥ विष्णुः॥ स-
वर्णस्यैव प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वा स्नानेन॥ अकृते अस्थिसंचयने सचैलस्नानेन
देवलः॥ श्वपाकं पतितं व्यंग्यमुन्मत्तं शवहारकं। सूतिकां सूपिकां नारीं रजसा च परि-
प्लुतां॥ श्वकुक्कुरवराहांश्च ग्राम्यान् संस्पृश्य मानवः॥ सचेलं सशिरः स्नात्वा तदानीमेव शु-
ध्यति॥ श्वादिभिः शिरःस्पर्शे स्नानं गात्रान्तरस्पर्शे क्षालनमाचमनमात्रं॥ तथा च शाता-
तपः॥ रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ॥ चेलनिर्णेजकश्चैव नटः शैलूषक

स्तथा॥ मुखे भगस्तथाश्वाच॥ वनिता सर्ववर्णगा॥ चक्री ध्वजी वध्यघाती ग्रामकुक्कुटसूक
रौ॥ एभिर्यदंगं संस्पृष्टं शिरोवर्जं द्विजातिषु॥ तोयेन क्षालनं कृत्वा आचान्तः शुचितामियात्
॥ चक्रीतैलिकः॥ ध्वजी शौण्डिकः॥ अत्र विष्णुः॥ भक्ष्यवर्ज्जं पंचनखं शवं तद्वत् स्थि सस्नेहं
च॥ ब्रह्मपुराणे॥ उदक्यां सूतिकां चैव श्ववानमन्त्यावसायिनम्॥ नग्नादीन् मृतहारांश्च
स्पृष्ट्वा शौचं विधीयते॥ स्नात्वा सचैलो मृद्भिः शुध्येद्द्वारप्रार्जनः॥ एतदेव भवेच्छौचं मैथुने वम
ने तथा॥ नग्नादयः पाषण्डाः मृद्भिः सूतिकादिस्पृष्टमङ्गं प्रक्षाल्येति शेषः॥ एतदनन्तरं स्नात्वेति
योज्यम्॥ मार्कण्डेयपुराणे॥ अभोज्यसूतिकाषण्ढमार्जाराखुश्वकुक्कुटान्॥ पतितापविद्धचाण्डा
लमृतहारांश्च धर्मवित्॥ संस्पृश्य शुध्यति स्नानादुदक्याग्रामशूकरौ॥ अत्र मार्जारस्पर्शे स्नानवि
धानात्॥ मार्जारश्च सदा शुचिरिति विष्णुस्मृतिर्भोजनादिविषया॥ अथावामार्जारिकर्मके स्पर्शे

अत्रस्नानविधिः॥मार्जारकर्त्तृके स्पर्शेदोषाभावइतिव्यवस्था॥चाण्डालादिस्पर्शेतुनविशेषव्यवस्था
प्रमाणाभावात्॥द्विविधाप्यवगाह्येति॥तथाचापस्तम्बः॥पद्भिःस्पृष्टंकाकबलाकिकाभ्याममेध्य
लिप्तंतुभवेच्छरीरम्॥श्रोत्रेमुखेनप्रविशेत्तुसम्यक्स्नानेनतल्लोपोपहतस्यशुद्धिः॥अस्यायमर्थः
काकबलाकिकाभ्यांपद्भ्यांपरिविष्टात्कृतात्शरीरमशुचिलिप्तंभवति॥तच्चाशुचियदिश्रोत्रमुख
योर्न्नप्रविशतितदास्नानेनैवशुद्धिरिति॥एवंमुखादिप्रवेशेप्रायश्चित्तान्तरंसूचितम्॥व्याघ्र
पादः॥चाण्डालादिकसंस्पृष्टःस्नानंकृत्वाविशुद्ध्यति॥हारीतः॥श्वपचमूत्रवत्प्रेतहारकशवान्संस्पृ
श्यस्पृष्ट्वादेवीरापइत्येताभिरन्तर्जलेस्नातःपूतोभवति।अजीर्णवान्तश्मश्रुकर्म्मायोनिपशु
दिवामैथुनेच॥सुमन्तुः॥अनुदकमूत्रपुरीषकरणेश्वनखकेशरुधिरप्राशनेसद्यःस्नानं
घृतप्राशनहिरण्योदकप्राशनेच॥शातातपः॥अशुचिंसंस्पृशेद्यस्तुएकएवसदुष्यति॥

रा०

२४

(52)

संस्पृष्टान्योन दुष्येत सर्वद्रव्येष्वयं विधिः॥ द्रव्येषु मधादिषु॥ अशुचिनरस्य स्पर्शे तत्स्पर्शे चाचमनं पूर्वोक्तं॥ यमः॥ आतुरस्नानसंप्राप्ते दशकृत्वस्त्वनातुरः॥ स्नात्वा स्नात्वा स्पृशेत् क्षिप्रं ततः शुध्येत स आतुरः॥ पराशरः॥ अस्तंगते यदा सूर्ये चाण्डालं पतितं स्त्रियं॥ सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते॥ जातवेदाः सुवर्णं च सोममार्गे तथैव च॥ ब्राह्मणानुमते चैव दृष्ट्वा स्नात्वा च शुध्यति॥ आचान्तमनुगर्ते वा निशि स्नानं न विद्यते॥ स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन च॥ जातवेदाः अग्निः॥ सोममार्गे आकाशं॥ ब्राह्मणानुमते स्नात्वा अग्न्यादिकं दृष्ट्वा शुध्यतीत्यर्थः॥ आचान्तमाचमनं॥ अनुगर्त्ते जलाशयं प्रविश्य निशीत्युभयत्रयोज्यम्॥ शंखः॥ नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं॥ तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः॥ नित्यं प्रातः स्नानं॥ नैमित्तिकं चाण्डालादिस्पर्शनिमित्तकं॥ क्रियांगं जपादिकर्म्माधिकारहेतुः मलकर्षणमभ्यंगपूर्वकं॥ ज्योतिःशास्त्रोक्तं पुष्यस्नानादि काम्यं॥ नद्याद्याधारकफलार्थं क्रियास्नानं बौधायनशंखेन घोरास्नानमुक्तं॥ अ

२१३

८३

त्क्रियास्नानएवतेधर्म्मविहिताः॥प्रातःस्नानेयथाहनितथाप्रातरित्यतिदेशाद्धर्म्माःअहरहः
स्नानेकात्यायनाद्युक्ताःस्नानान्तराणिनिमज्जनमात्ररूपाणिधर्म्मसंबंधेप्रमाणाभावात्॥
नचातिदेशःसर्वेषांस्वधर्म्मकत्वेविशेषोद्देशेनधर्म्मविविधवैफल्यात्॥नचगुणफलेविशेषःतद
भावात्॥अपिचनैमित्तिकेधर्म्माभावउक्तएव॥काम्यपुष्यस्नानादिमलापकर्षणायोस्तुलौ
किकयोर्न्नालौकिकधर्म्मागमितिरस्यसूत्रेसाधितत्वान्नालौकिकाङ्गसंबंधःक्रियाङ्गःस्नानेप्य
ङ्गिरवस्तु [illegible] द्यभिधानाद्धर्म्माविः॥अतएवहेत्वन्तरस्याप्युक्तेःनिमज्जनमात्रेपिक्रियास्नानस्यैव
प्रयोगानुष्ठानं॥हरिहरोपि॥क्रियास्नानप्रातःस्नानयोरेवधर्म्मानाह॥क्रियास्नानंकिंचिद्फला
र्पितयाकथितमप्यहरहःस्नानादभिन्नं॥तत्रापिपापक्षयरूपस्यफलस्यसत्त्वादितिभट्ट
येनविशेषमाह॥एवंस्नानानुकल्पोपिश्रुतमात्रमनुष्ठेयम्॥स्नानानुकल्पमाहयोगियाज्ञव
ल्क्यः॥कालदोषादसामर्थ्यान्नरःक्लान्तियदाभवेत्॥तदाग्नात्वाऋषिभ्यस्तुमंत्रैरेवंतुमार्ज्ज

ना१

राम०
२५

53

ने॥ शन्न आपस्तु द्रुपदा आपो हि ष्ठा त्वघमर्षणं॥ एभिश्चतुर्भिर्मंत्रैस्तु मंत्रस्नानमुदाहृतं॥ तथा॥
अप्राप्त्यैस्तमुत्पन्ने स्नानमेव समाचरेत्॥ कालदोषेति वृष्ट्यादिः तेन रोगाही नो प्राप्तिवृ
ष्ट्यादौ स्नानजनयितव्यरोगसंभावनायामाप्लवस्नानं कुर्यात्॥ असामर्थ्यमुत्पन्नरोगत्वं
स्नानमेवेति वारुणस्नानपरं॥ जाबालिः॥ अशिरस्कं भवेत्स्नानं स्नानाशक्तौ कर्म्मिणाम्॥
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः॥ हारीतः॥ आग्नेयं भस्मना स्नानम
द्भिर्वारुणमुच्यते॥ आपो हि ष्ठेति च ब्राह्म्यं वायव्यं गोरजः स्मृतं॥ यत्तु सातप वर्षेण
स्नानं तद्दिव्यमुच्यते॥ एतैस्तु मंत्रतः स्नात्वा तीर्थानां फलमाप्नुयात्॥ मंत्र इति पंच
स्वपि स्नानेषु मंत्रविधायकं॥ ब्राह्म्य वारुणयोर्मंत्रस्य प्राप्तत्वात्॥ किन्तु दिव्यवा
रुकमेव फलसंबंधपरत्वात्॥ अत्र योगियाज्ञवल्क्येन मृदा स्नानं भस्मस्तु पार्थिवमि

ति॥ मानसं विष्णुचिन्तनमिति स्नानद्वयमधिकमुक्तं॥ कात्यायनः॥ अथातो नित्य-
स्नानं॥ नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य
प्रक्षाल्य पाणिपादौ कुशोपग्रहो बद्धशिखो यज्ञोपवीत्याचम्योरु[illegible]हीति तोयमामंत्र्या-
वर्त्तये ये ते शतमिति सुमित्रिया न इत्यपोञ्जलिनादाय दुर्मित्रिया इति द्वेष्यं प्रति
षिंचेत्॥ कटिं बस्ति मूरू जंघे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमा-
लभेद् गङ्गा निम्न देवं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदा-
भ्य इत्युन्मज्य निमज्योन्मज्यवाचम्य गोमयेनावलेपमानस्तोकइति॥ ततो-
ऽभिषिंचेदिमं मे वरुणेति चतसृभिर्म्मा यउदुत्तमं मुच्चत्ववभृथेत्यन्ते चैतान्निमज्यो-
न्मज्याचम्य दर्भैः पावयेदापो हि [illegible]ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीरप

राम
२६

(56)

इतिद्वाभ्यामपोदेवाद्रुपदादिवशंनोदेवीरपांरसमयोदेवीःपुनंतुमेतिनवभिस्त्रिस्त्यतिर्म्मेत्योङ्का
रेणाव्याहृतिभिर्गायत्र्याचाद्यावन्तेचान्तर्ज्जलेचाघमर्षणंत्रिरावर्त्तयेद्द्रुपदांवायंगौरितिवाऋ
चंप्राणायामंवासशिरसमोमितिवाविष्णोर्वास्मरणं॥अथेतितृतीयभागानन्तर्यार्थं॥प
तःस्नानेनकर्म्माधिकारः॥अतोनित्यमहरहःस्नानंकर्त्तव्यमितिशेषः॥यदाहविष्णुः॥स्नातो
धिकारीभवतिदैवेपैत्र्येचकर्म्मणि॥पवित्राणांतथाजप्येदानेचविधिदर्शितइतिनन्वहरहः
स्नानस्यनित्याधिकारवलादेवकर्त्तव्यतासिद्धेरतइतिहेत्वाभिधानंव्यर्थं॥नैवं·प्रासंगिकी
कर्म्माधिकारितापरैवपरत्वात्॥नचनित्यस्नानंप्रातःस्नानं॥अस्नातस्तुपुमान्नार्हेजप्या
ग्निहवनादिषु॥प्रातःस्नानतदूर्ध्वन्तुनित्यस्नानमुदाहृतमितिशंखस्मरणादितिवाच्यं॥स्ना
नोत्तरंकासायनमध्यान्हकृत्यस्यैवाभिधानात्॥अतएवकामधेन्वादौचतुर्थभागकृत्येलिख

नं॥मद्दारोऽत्रष्यन्तरोक्तविशेषः प्रयोगादेवावगन्तव्यः॥ अत्र यो गायत्र्यः केनात्रिधास्थापितमङ्गो
मयाभ्यामधोन्तममध्यमाङ्गुष्ठानमुक्तं॥ तत्कात्यायनीयसौत्रकर्मविरोधान्नग्राह्यं॥ एवमन्यदपि
कमत्र कल्पेत्यक्तव्यं॥ आचमननिमित्तपातेतुनसौत्रकर्मविरोधइति दर्शितं प्राष्टाकोपे· कुशोप
ग्रहः कुशहस्तः। उपात्स्यतेऽनेनेत्युपग्रहो हस्तः। नित्यं यज्ञोपवीतीति पुरुषार्थविधिप्राप्तय
ज्ञोपवीतित्वे यज्ञोपवीतीति वस्त्रधारणार्थमिति कात्यायनभाष्यं॥ तदयुक्तं॥ परिसंख्याप
त्तेः तस्मात्कर्मत्वार्थत्वापयवरांप्रकरणात्॥ तेनदैवाह्निकेपि यज्ञोपवीतेनदुस्त्याघस्नान
मितिसिद्धंति· एवानियतकेशावेशाः सर्वेषां मुक्तशिखावर्जनमितिनिषेधात्· पुरुषार्थता
शिखाबंधनस्नाभेवद्धशिखीति कत्वङ्गतालाभार्थे· द्वेष्यप्रतिनिषिंचेत्॥ द्वेष्यं बुद्धस्थीकृत्य
स्पांदिशि देष्यास्तिष्ठतिनस्यांक्षिपेदित्यर्थः॥ नमस्पनमस्तकृत्यन्त्रालभेतस्पृशेत्· न

घारा वितिउपक्रम्यसूर्य्याभिमुखइत्यभिधानात्॥ नद्यांस्रवन्त्सु चस्नायात्प्रति स्रोतः स्थितो द्वि
जइति नरसिंहपुराणं॥ विषपानोरस्मात्वेति श्रवणात् पुनर्निमज्जनं॥ निमज्जोन्मज्जेति
चापरीमितिनिमज्जनत्रयसिद्धिः॥ अभिषिंचेत्। हस्तेनजलंशिरसि क्षिपेत्॥ अन्तेचैतद्वक्ष्यमा
णमार्ज्जनान्तेपुनःमंत्रकरणकाभिषेककर्म कुर्य्यादित्यर्थः॥ तथैवप्रतत्वात्॥ नत्वेतन्मंत्र
जातंवक्ष्यमाणमार्ज्जनान्तेमार्ज्जनएवेतिकल्पना॥ तत्राभिषेकोमार्ज्जनंचप्रत्यचमेवलिं
गात्॥ चतसृभिस्तिसृभिरित्यादित्वनेकत्वप्रा प्त्यर्थमेवनतुमिलितविनियोगार्थमपि॥ दर्भैरिति
बहुत्वंत त्वपर्य्यवसितंकपिञ्जलन्यायात्॥ पावयेत् मार्ज्जनंकुर्य्यात् मार्ज्जनमुदबिन्दू
नांशिरसिक्षेपः॥ चित्पतिर्मेति प्रतिप्रतीकेन॥ चित्पतिर्मापुनात्वित्यस्याछिद्रेणेत्यादिशेष
सहितस्यैकस्यैवयजुषोग्रहणं॥ छिद्रेत्यादि संख्यापाश्रवणात्॥ कल्पसूत्रेतुचित्पतिर्मेति

(59)

पावपतिप्रति मंत्रमार्क्षिकेणेति सर्वैतिदीर्घासि पावने विशेषश्रवणात्मंत्रत्रयान्तहरणं श्रु
तावपिप्रत्येक मंत्रपाठात्॥ व्याहृतिभिस्तिसृभिरत्रैव बवात्॥ प्रणवो भूर्भुवःस्वरित्यादौ
दर्शनाच्च। गायत्र्याचादावन्ते चेति च॥ आपोहिष्ठेत्यादि मंत्रसाध्यमार्जने नाद्यन्तयोर्गाय
त्र्यामार्जनमिति यद्यपि प्रतिभाति। सन्निहितसम्बन्धेनैवोपपत्तेस्तथाप्याद्यावेवोङ्का
रव्याहृत्यनुष्ठानदर्शनात्। तत्संबंधेपि काप्यपना शापयुज्नीयते। प्राणायामः कार्य इ व्य ५
तिशेषः सशिरस्त्रीतिस्त्रिपाविशेषणत्वान्नपुंसकत्वमार्षत्वाद्वा॥ ओमितिवावर्त्तयेदि
तिव्यवहितसंबंधः॥ आवर्त्तयेद्वाप्रणवमितियोगियाज्ञवल्क्यदर्शनात्॥ विष्णोर्वा
स्मरणं कर्त्तव्यमिति शेषः॥ गौतमः॥ अन्तर्जलेवाघमर्षणं त्रिरावर्त्यसर्वस्मादेनसो रा॰
मुच्यते॥ मनुशंखयोगियाज्ञवल्क्याः॥ यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः॥ तथा

२८

ग्घमर्षणंसूक्तं सर्वपापप्रणाशनम्॥ बृहस्पतिः॥ द्रुपदादिवयोमंत्रो वेदेषु संने
षिके॥ अन्तर्जले त्रिरावर्त्त्य सर्वपापैः प्रमुच्यते॥ अन्तर्जले जपे अघादि स्मरणं
कर्त्तव्यं॥ अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपम्॥ होममन्तर्जपादीनि तस्य
चाल्पफलं भवेदिति योगियाज्ञवल्क्यदर्शनात्॥ अथ कात्तीयस्नानप्रयोगः॥ पथ्यो
क्तमृत्तिकामादाय गोमयं कुशान्कृष्णतिलान्सुरभि पुष्पाणि पात्रापसुमनान धारयित्वा ग
त्वा तत्तीरेषु चौरदेशोपपथ्यकु स्थापयेत्॥ ततः पाणिपादं प्रक्षाल्य कुशहस्तो बद्धशि
खी आचमेत्॥ ततः ॐ उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ॥ अप
दे पादाप्रतिधातवे करुताप वक्ताहृदयाविधश्चित्॥ नमो वरुणायाभिष्ठितो वरुणस्य
पाशइति तोयमामंत्र्य॥ ॐ येते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥

(62)

आ० तेभिर्न्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्का इति प्रदक्षिणां जलमावर्त्तये
२९ त्॥ ॐ सुमित्रिया न आप ओषधयः संतु इति जलांजलिमादाय॥ दुर्म्मित्रिया स्त
स्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः॥ इति द्वेष्यप्रति निषिंचेत्॥ ततः कटिं वस्तिमू
रू जंघे चरणौ करौ प्रत्येकं मन्त्रोपाभ्यां त्रिस्त्रिः प्रक्षाल्य एकं पादं स्थले जले चापरं
निधायाचमेत्. तत उदकं नमस्कृत्य॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य
२५ पां९ सुरे इति मृत्तिकया क्षालितः सं नाभिमात्रं जलं प्रविश्य॥ ॐ आपो अस्मान्मातरः शु
न्धयन्तु घृतेन नो घृतप्वः पुनन्तु विश्व९ं हि रिप्रं वहंति देवीः इति मंत्रेण॥ सूर्याभिमुखो नि
मज्जेत्॥ ततः स्नात्वा ॐ उदिताभ्यः शुचिरा पूत एमि इति निमज्योन्मज्याचम्य॥ ॐ मान
स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान्रुद्र भामिनो वधी

हविष्मंतःसदमित्त्वाहवामहे·इतिगोमयेनगात्राणिविलिंपेत्·ॐइमंमेवरुणश्रुधीहवम
द्याचमृडय।त्वामवस्युराचके॥ॐतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहवि
र्भिःअहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ॐत्वन्नोऽग्नेवरुणस्यवि
द्वान्देवस्यहेडोअवयासिसीष्ठाःयजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्म
त्॥ॐसत्वन्नोऽग्नेवमोभवऊतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुणंरराणो
वीहिमृडीकंसुहवोनएधि·ॐमापोमौषधीर्हिंसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमु
ञ्च·यदाहुरघ्न्याइतिवरुणेतिशपामहेततोवरुणनोमुंच·ॐउदुत्तमंवरुणपाशमस्मदवा
धमंविमध्यमंश्रथाय·अथावयमादित्यव्रतेतवानागसोअदितयेस्याम·ॐमुञ्चन्तुमाश
पथ्याद्दथोवरुण्यादुतअथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात्·ॐअवभृथनिचुम्पुणनिचे
रुरसिनिचुम्पुणःअवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि॥इत

(65)

आ०
३०

षड्भिर्मंत्रैः प्रत्येकं हस्तेन शिरसि जलं क्षिपेत् ततो वहति जले प्रवाहाभिमुखः स्थिरे सूर्याभिमु
खो मौनी शरवत्त्रिर्निमज्जेत् तत्र आचम्य ॐकारव्याहृतिगायत्रीभिरापोहिष्ठेत्यादिभिस्ति
सृभिः ॐ इदमापः प्रवहतावद्यं च मलं च यत् यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणाम् ॐ आ
पो मा तस्मादेनसः पवमानश्च मुंचतु ॐ हविष्मतीरिमा आपो हविष्मान् ॥ आ
विवासति हविष्मान्देवो अध्वरो हविष्मानस्तु सूर्यः ॥ ॐ देवीरापो अपां नपाद्यो
व ऊर्मिर्हविष्य इन्द्रियावान्मदिंतमः ॥ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां
भागस्थ स्वाहा ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि समापो अद्भिरग्म
त समोषधीभिरोषधीः ॐ आपो देवा मधुमतीरगृभ्णन्नूर्ज्जस्वती राजस्वश्चि
तानाः याभिर्मित्रावरुणावभ्यषिंचन्याभिरिन्द्रमनयन्नत्यरातीः ॥ ॐ द्रुपदा
दिव मुमुचानः स्विन्नः स्नातो मलादिव ॥ पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः

65

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः ॥ ॐ आपां रसमुद्वयस आ
ऽसूर्ये सन्तं समाहितं ॥ अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमं ॐ आपो देवीरुपसृज मधु
मतीरयक्ष्माय प्रजाभ्यः ॥ तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ॐ पुनन्तु
मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ॥ पवित्रेण शतायुषा ॥ ॐ पु
नन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥ विश्वमायुर्व्यश्नवै ॥ ॐ अ
ग्न आयूंषि पवस आ सुवोर्ज्जमिषं च नः ॥ आरे बाधस्व दुच्छुनां ॥ ॐ पुनन्तु मा देवजनाः
पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मां ॥ ॐ पवित्रेण पुनीहि मा
शुक्रेण देव दीद्यत ॥ अग्ने क्रत्वा क्रतूंरनु ॥ ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ॥
ब्रह्म तेन पुनातु मा ॥ ॐ पवमानः सो अद्य नः पवित्रेण विचर्षणिः ॥ यः पोता स पुना
तु मा ॥ ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ ॐ वैश्वदेवी पुनती दे

66

ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः ॥ ॐ आपां रसमुद्वयसꣳ
सूर्ये सन्तꣳ समाहितं ॥ अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमं ॐ आपो देवीरूपसृज्ञ मधु
मतीरयक्ष्माय प्रजाभ्यः ॥ तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ॐ पुनन्तु
मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ॥ पवित्रेण शतायुषा ॥ ॐ पु
नन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥ विश्वमायुर्व्यश्नवै ॥ ॐ अ
ग्न आयूꣳषि पवस आसुवोर्ज्जमिषं च नः ॥ आरे बाधस्व दुच्छुनां ॥ ॐ पुनन्तु मा देवजनाः
पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मां ॥ ॐ पवित्रेण पुनीहि मा
शुक्रेण देव दीद्यत ॥ अग्ने क्रत्वा क्रतूꣳरनु ॥ ॐ यत्ते पवित्रमर्च्चिष्यग्ने विततमन्तरा ॥
ब्रह्म तेन पुनातु मा ॥ ॐ पवमानः सो अद्य नः पवित्रेण विचर्षणिः ॥ यः पोता स पुना
तु मा ॥ ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च ॥ मां पुनीहि विश्वतः ॥ ॐ वैश्वदेवी पुनती दे

आ०
३१

व्यागाघस्याभिमावक्यस्तन्वोवीतपृष्ठः॥ तथा मरुतः सरमारेष्ठवयुऽस्मामपतः योएषी
णाम्॥ ॐ चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण सूर्य्यस्य र
श्मिभिः॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयं॥ इति प्रत्येकं मंत्रैः पु
नरोंकारव्याहृतिगायत्रीभिः कुशपत्रेण मार्ज्जनं कुर्य्यात्॥ ततः पूर्ववत्॥ ॐ इमं मे वरुण
इत्यादिमंत्रैः शिरसि जलं क्षिपेत्॥ ततश्चाप्यादिकं स्मृत्वा मग्नो ऽघमर्षणं द्रुपदां वाअयं
गौरिति वा ऋचं त्रिरावर्त्तयेत्। वक्ष्यमाणमंत्रैस्त्रिरावर्त्तैः प्राणायामं वा कुर्य्यात्॥ अघम
र्षं वा त्रिरावर्त्तयेत्। विष्णुं वा स्मरेत्। योगियाज्ञवल्क्यः॥ आचान्तः पुनराचमेन्मंत्रवत्स्ना
नभोजने॥ मंत्रमाह। द्रुपदां वा त्रिरावर्त्य तथा चैवाघमर्षणं॥ गायत्रीं वा त्रिरावर्त्य महा
व्याहृतिभिस्तथा॥ सोपांशु प्रणवेनापि आपः पीताः अघापहाः॥ एतन्नाचमनं मज्जं
नानन्तरं मार्ज्जनात्। प्राक् आचम्य आप्लाव्य चात्मानं त्रिरापम्य शनैः स्वनः अघोप

आचम्य च ततः पश्चात् २ नजापते॥ तस्मान्मनोविमुग्धं यं स्नानमाग्नेयं विधीयते। अनुद्वै

रिश्चेद्रश्मिरूपमित्यग्रे आप्लाव्येत्यनेन मार्ज्जनाभिधानात्॥ यदि स्नानापनेयमप्रापत्यं स्या
त्तदोक्तस्नानविधेः प्राग्गालस्नानं कर्त्तव्यं॥ यत आह· तुष्णीमेवावगाहेत यदास्यादशुचिर्न्न
रः स्नानं विधिवदाचरेत्· अथ पद्मपुराणीयस्नानविधिः॥ तत्र पद्मपुराणं॥ नैर्मल्यं भा
वशुद्धिश्च विना स्नानं समाचरेत्· तीर्थं प्रकल्पयेद्विद्वान्मूलमंत्रेण मंत्रवित्॥ ॐ नमो
नारायणायेति मूलमंत्र उदाहृतः॥ प्रकल्प्यावाहयेद्गंगामेभिर्मन्त्रैर्विचक्षणः॥ ॐ वि
ष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता॥ पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्ति
कात्॥ तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्॥ दिवि भुव्यन्तरीक्षे च तानि ते संति
जाह्नवि॥ नन्दिनीत्येव ते नाम देवेषु नलिनीति च· वृन्दा पृथ्वी च सुभगा विश्वकाया शि
वा सिता॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी॥ क्षेमा च जाह्नवी चैव शान्ता
दर्भपाणिस्तु विधिनाऽऽचान्तः प्रयतः शुचिः॥ चतुर्हस्तसमायुक्तं चतुरस्रं समंततः ५

प्रतिचायमेवस्नानविधिः प्रशस्तः॥ वेदमंत्रशून्यत्वात्॥ विष्णुः॥ स्नातएवसोष्णीषेधौ
वाससीबिभृयात्॥ उष्णीषधारणंशिरोजलप्रच्छवार्थमाचमनात्प्राक्॥ पराशरः॥ स्ना
त्वानिरस्यवासोऽन्यज्जंबुप्रक्षालयेन्मृदा॥ अपवित्रीकृतेतेनतु कौपीनच्युतवारणा
कौपीनमक्षोवस्त्रं॥ योगियाज्ञवल्क्यः॥ स्नात्वैवंवाससीधौतेआक्लिष्टेपरि
धायच॥ प्रक्षाल्योरूमृद्भिश्चहस्तौप्रक्षालयेत्तथा॥ अभावेधौतवस्त्रस्य
शाणक्षौमाविकानिच॥ कुतपयोगपट्टंचाद्विवासायेनवैभवेत्॥ कुतपो
नेपालकम्बलः॥ जाबालिः॥ नार्द्रमेकंचवसनंपरिदध्यात्कथंचन॥
अत्रसाटातननिषेधवचनात्सुरुषार्थता॥ नरसिंहपुराणे॥ नरकमुत्त्वरांगवा
सोननीलंचप्रशस्यते॥ मलाक्तंवदशाहीनंवर्जयेदम्बरंबुधः॥ ततः प्र

प्रति चाप्यमेव स्नानविधिः प्रशस्तः ॥ वेदमंत्रशून्यत्वात् ॥ विष्णुः ॥ स्नात एव सो त्नीये धौ

वाससी बिभृयात् ॥ उत्तीय धारणं शिरोजलप्रोक्षणवार्यमाचमनात्प्राक् ॥ पराशरः ॥ स्ना

त्वा निरस्य वासो ऽन्यजं च प्रक्षालयेन्नरः ॥ अपवित्री भवेत् तेनैतु कौपीनच्युतवारणाः

कौपीनमथो वस्त्रं ॥ योगियाज्ञवल्क्यः ॥ स्नात्वैवं वाससी धौते आक्लिष्टे परि

धायच ॥ प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षालयेत्तथा ॥ अभावे धौतवस्त्रस्य

शाणक्षौमाविकानि च ॥ कुतपायोगपट्टं च द्विवासा येन वै भवेत् ॥ कुतपे

नेपालकम्बलः ॥ जाबालिः ॥ नार्द्रमेकं च वसनं परिदध्यात्कथंचन ॥

अत्र सार्द्रतन निषेधव ... त्पुरुषार्थता ॥ नरसिंहपुराणे ॥ नरकेषु वराङ्गना

सो नन्दीतं च प्रपद्यते ॥ मत्स्याक्तं वद्ध्याहीनं वर्जयेद्ध्वरं बुधः ॥ ततः प्र

आ०
३२

क्षालयेत्पादौ मृत्तोयेन विचक्षणः ॥ उत्त्वनं व्यक्तमेतच्च विशेषणं रक्तस्य ॥ तेना
त्तवनं रक्तमित्यर्थः ॥ उत्त्वणं मुद्धतमिति केचित् ॥ अत्र हारीतः ॥ न बाहू विधुनु
यान्नोत्तरीयविपर्यासं कुर्यात् ॥ विष्णुः ॥ स्नातः शिरो न विधुनेत्तनाङ्गेभ्यः
स्तोयमुद्धरेत् ॥ न तैलवसेस्पृशेत् न प्रक्षालितं पूर्वधृतं वासो बिभृयात् न म्ले
च्छान्त्यजपतितैः सह संभाषणं कुर्यात् तैलं च वसा च तैलवसे ॥ मार्कण्डेयपु
राणे ॥ अपमृज्यान्न च स्नातो गात्राण्यम्बरपाणिना ॥ अम्बरं स्नानवस्त्रं ॥
स्नानशाटीति विष्णुपुराणपाठात् ॥ एवं च न स्नात्वा गात्रमवमृज्यादिति हा
रीतेऽपि स्नानशाट्या च पाणिना च विशेषणीयम् ॥ एवं च समर्थं प्रति परिमार्ज
नमात्राभावोऽङ्गेऽसमर्थं प्रति पाणिशाटीपरिमार्जनाभाव इति हारिहरेऽन्ये

रो०

72

आ०

३२

क्षालयेत्पादौ मृत्तोयेन विचक्षणः॥ उक्तं च व्यक्तमेतच्च विशेषणां रक्तस्य॥ तेना
प्यन्तरक्त मित्यर्थः॥ उक्षणमुद्धृतमिति केचित्॥ अत्र हारीतः॥ न बाहुं विधुनु
यान्नोत्तरीयविपर्यासं कुर्यात्॥ विष्णुः॥ स्नातः शिरो न विधुनेत न चाङ्गेभ्य
स्तोयमुद्धरेत्॥ न तैलवसेस्पृशेत् न प्रक्षालितं पूर्वधृतं वासो बिभृयात् नम्ले
च्छान्त्यजपतितैः सह संभाषणं कुर्यात् तैलं च वसा च तैलवसे॥ मार्कण्डेयपु
राणे॥ अपमृज्यान्न वस्त्राते गात्राण्यम्बरपाणिना॥ अम्बरं स्नानवस्त्रं॥
स्नानसाटीति विष्णुपुराणपाठात्॥ एवं च न स्नात्वा गात्रमवमृज्यादिति ह
रीतेपि स्नानशाट्या च पाणिना च विशेषणीयम्॥ एवं च समर्थं प्रतिपरिमार्ज
नमात्राभावोऽङ्गे अस माथ्यें प्रतिपाणिशाटी परिमार्जनाभाव इति हरिहरेणोक्तं

रो०१

ना।

ि:

मच्छेद्यं॥सांख्यायनगृह्यं॥आप्लुत्याभ्युदकोन्यद्वस्त्रमाच्छादयेत्॥अभ्युदकोरुश
तोदकः॥एषापिपारि॥स्नानवस्त्राभ्यामुद्धरणे॥निषेधः॥कुलविशेषनियतोवा॥गृ
ह्योक्तत्वात्॥अत्रशंखः॥उदकस्याप्रदानाद्धिस्नानशाटींनपीडयेत्॥अथविष्णुः॥या
म्यांहियातनादुःखंनित्यस्नायीनपश्यति॥नित्यस्नानेनपूयंते अपिपापकृतोनराः
योगियाज्ञवल्क्यः॥अगम्यागमनात्स्तेयात्पापेभ्यश्चप्रतिग्रहात्॥रहस्याचरितात्पाप
न्मुच्यतेस्नानमाचरन्॥पापेभ्यःपतितादिभ्यः॥छंदोगपरिशिष्टे॥संध्यालोपस्यवा
कर्त्तास्नानशीलश्चयःसदा॥तंदोषानोपसर्प्यन्तिगरुत्मंतमिवोरगाः॥अथसंध्योपा
सनं॥तत्रछंदोगपरिशिष्टे॥अतउद्धंप्रवक्ष्यामिसंध्योपासनिकंविधिं॥अनर्हःकर्म
णांविप्रःसंध्याहीनोयतःस्मृतः॥संध्येतिवक्ष्यमाणप्राणायामादिकर्मनामउपास
नंसेवाअनुष्ठानमितियावत्॥आचारसेविनीत्यादौदर्शनात्॥अतएवसंध्याकृतासं

त२

(७५)

आ०
३४

ध्योपासितेतितु स्पष्टत्प्रयोगः॥ अथवा ब्रह्मणोपासिता संध्या विष्णुना शंकरेण च॥ कस्तां
नोपासयेद्देवीं सिद्धिकामो द्विजोत्तम इति योगियाज्ञवल्क्येन देवीत्वेन कीर्त्तनात्॥ संध्या
रूपाया देवताया वक्ष्यमाणप्राणायामादिना उपासनमाराधनं संध्योपासनं॥ अन
र्हः कर्मणामित्यादिना संध्योत्तरकर्मणिाकृतसंध्यस्याधिकार इत्युक्तं॥ अथवाचिरं
त्वरसंध्यात्यागिनः पतितस्य द्विजातिकर्मानकारः॥ नानुतिष्ठति यः पूर्वां नोपास्ते
यश्चपश्चिमाम्॥ स शूद्रवद्बहिः कार्य्यः सर्वस्माद्द्विजकर्मण इति मनुदर्शनात्॥ विष्णु
पुराणे॥ सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते॥ अन्यत्र सूतिकाशौचविभ्रमातु
रभीतितः॥ विभ्रमश्चित्तविक्षेपः॥ मेघादिनाकालज्ञानमित्येके॥ यद्यप्यत्र मध्याह्नसं
ध्यानोक्तातथाप्येतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितं॥ यस्य नास्त्यादरस्तत्र न स
ब्राह्मण उच्यते॥ इति छन्दोगपरिशिष्टात्॥ संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा

आ०
३४

ध्योपासितेतितु स्यवत्प्रयोगः॥ अथवा ब्रह्मणोपासिता संध्या विष्णुना संकरेण च। कस्तां
नोपासयेद्देवीं सिद्धिकामो द्विजोत्तम इति योगियाज्ञवल्क्येन देवीत्वेन कीर्त्तनात्॥ संध्या
रूपाया देवताया वक्ष्यमाण प्राणायामादिना उपासनमाराधनं संध्योपासनं। अन
र्हः कर्मणामित्यादिना संध्योत्तरकर्मणि ह्यकृतसंध्यस्याधिकार इत्युक्तं॥ अथवा चिरं
त्तरसंध्यात्यागिनः पतितस्य द्विजातिकर्मानकारः॥ नानुतिष्ठति यः पूर्वां नोपास्ते
यश्च पश्चिमां॥ स शूद्रवद्बहिः कार्य्यः सर्वस्माद्द्विजकर्मणः इति मनुदर्शनात्॥ विष्णु
पुराणे॥ सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते॥ अन्यत्र सूतिकाशौचविभ्रमातु
रभीतितः: विभ्रमश्चित्तविक्षेपः॥ मेघादिना कालज्ञानमित्येके॥ यद्यप्यत्र मध्याह्न सं
ध्यानोक्ता तथाप्येतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितं॥ यस्य नास्त्यादरस्तत्र न स
ब्राह्मण उच्यते॥ इति छन्दोगपरिशिष्टात्॥ संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा

तियोगियाज्ञवल्क्यवचनाद्बसापिवोद्धव्या॥एतेनसंध्यात्रयेनित्याधिकारोदर्शितः॥पा
पक्षयकारोप्यत्र॥यदाहयाज्ञवल्क्यः॥दिवावायदिवारात्रौयदज्ञानकृतंभवेत्॥
त्रिकालसंध्याकरणात्तत्सर्व्वंविप्रणश्यति॥सततंसंध्यानित्यातस्यफलान्तरमप्या
हयमः॥संध्यामुपासतेयेतुसततंशंसितव्रताः॥विधूतपापास्तेयांतिब्रह्मलोकंस
नातनं॥संध्याद्वयेप्रत्येकमपिपापक्षयमाहमनुः॥पूर्वांसंध्यांजपंस्तिष्ठन्नैशमेनो
व्यपोहति॥पश्चिमांतुसमासीनोमलंहन्तिदिवाकृतं॥नन्वेवंकेवलमध्याह्नसंध्यायां
किंप्रमाणं।मेवं॥उत्तीर्य्यधौतवाससीपरिधायमृदोरूकरौप्रक्षाल्याचम्यत्रिराय
द्विकाल्या म्यासून्नित्यांयनेमध्याह्नस्नानोत्तरंनरसिंहपुराणाद्दौचकेवलायाअपिवस्यमा
णत्वात्॥एवंसंध्यात्रयेप्रत्येकमपिकर्त्तव्यतायादर्शितत्वात्॥एकसंध्यालोपेऽ
परापिनकर्त्तव्यमितिलिखितविषयत्वादधिकारस्येतिदुर्मतिः दृष्टामाहतुशंखलिखितौ॥स

आ०
३५

हा। [illegible]

व्रतीवहिः संध्यामुपासीत्॥ सव्रतीब्रह्मचारी॥ व्रतयुक्ताध्ययनशालित्वात्· वहिर्ग्रामात्॥ नै
नंग्रामेऽभिनिम्लोचेत्सूर्योनाभ्युदियात्क्वचिदितिमनुदर्शनात्॥ एवंब्रह्मचारिणं॥ अभि
निम्लोचेत्॥ अस्तंपायात्॥ गुणफलमाहशातातपः॥ अनृतंमद्यगंधंचदिवामैथुनमेवच॥
पुनातिवृषलस्यान्नंवहिः संध्यामुपासिता॥ गृहेषुप्राकृती संध्या गोष्ठेशतगुणास्मृ
ता· नदीषुशतसाहस्राअनन्ताशिवसंनिधौ। प्राकृती एकगुणा॥ व्यासः॥ बहिःसंध्या
दशगुणागोष्ठप्रस्रवणादिषु॥ व्यासतीर्थेशतगुणासाहस्रीजाह्नवीजले॥ संध्याकाल
परिमाणमाहयोगियाज्ञवल्क्यः॥ ह्रासवृद्धीतुसततंदिवसानांयथाक्रमं॥ संध्यामुहूर्त्त
मात्रंतुह्रासेवृद्धौच सास्मृता॥ सर्वर्त्तुषुप्रातःसंध्यासायंसंध्याचदण्डद्वयमेवभवतीत्य
र्थः॥ तथासंधौसंध्यामुपासीतनास्तमयेनोदितेरवौसंधाविति पूर्वविधानात्॥ नास्तगर
तिसंधिरूपमुहूर्त्ते दृष्टेनिषेधानुवारकं॥ सतिसंभवेसादित्यमारभेतेत्येवंपरंवा॥

उपक्रमकालमाह संवर्त्तः ॥ प्रातः संध्यां सनक्षत्रामुपासीत यथाविधि ॥ सादित्यां पश्चिमां
संध्यामर्द्धास्तमित भास्करां ॥ सादित्यामिति अस्तमयप्राच्य पूर्णसूर्यविम्बपरम् ॥ समाप्ति
संध्यामर्द्धास्तमित भास्करां ॥ सादित्यामिति अस्तमयप्राच्य पूर्णसूर्यविम्बपरम् ॥ संध्यां प्राक् प्रातरे
कालमाह याज्ञवल्क्यः ॥ जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ॥ संध्यां प्राक् प्रातरे
वंहितिष्ठेदासूर्यदर्शनात् ॥ प्रत्यक् पश्चिमाभिमुखः । प्राक् पूर्वाभिमुखः ॥ आसीतेति
सायंजपे आसीनत्वार्थं तिष्ठेदिति प्रातर्जपे उर्द्ध्वत्वार्थं मध्यान्हसंध्याजपे पूर्ववत्तिष्ठेदेव ॥ ति
ष्ठेदुदयनात्पूर्वां मध्यमामपि शक्तितः इति छंदोगपरिशिष्टात् ॥ स्नानोत्तरत्वं मध्यान्हसं
ध्यायाः प्रागेवोक्तं ॥ मनुः ॥ ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः ॥ प्रज्ञां यशश्च कीर्त्तिं
च ब्रह्मवर्चसमेव ॥ दीर्घसंध्यत्वं प्रातरुदयावधि जपेन सायं च नक्षत्रावधि जपेन एतच्च गु
राफलमिति वाक्यान्तरेऽपि सूर्यनक्षत्रयोरेवावधित्वफलार्थं एक मूलत्वानु

79

आ०
३६

रोधात्॥ अथवा सूर्य्यनक्षत्रयोः प्राक्का लोपि नित्यजपांगतया बोध्यते· नतु कालस्य जपे
नातिव्याप्तिरित्यत्रापि तात्पर्य्यं॥ उभयपक्षेपि कामनमनं विरहे विहितदशादिसंख्यादरः॥
कामिनस्तु दीर्घसंध्यत्वश्रवणा॥ जपेन कालव्याप्तेरेव तात्पर्य्यमिति॥ अत्र च जपदीर्घ
त्वेन दीर्घसंध्याया अभिधानाज्जपेन संध्याकर्मसमाप्तिरिति मन्तव्यम्॥ उभे संध्ये जप
न्नन्यमुपासीत यथाविधीत्यादिवाक्येषु सावित्रीजपस्य संध्यान्तर्गतमस्फुटः एवमजपे
प्रत्यवायश्रवणांतरभिप्रायमेव॥ फलं तु नैसा वित्रीजपः पृथगपीति॥ अघम
र्षणसूक्तस्यापोहिष्ठेति त्र्यृचस्य द्रुपदाया अघ अर्घ्यादिकमुक्तं॥ योगियाज्ञ
वल्क्यः एवं ज्ञात्वा तु मंत्राणां प्रयोगं वै द्विजोत्तमाः॥ संध्यामुपासयेद्यस्तु
यथावत्तन्निबोधत॥ अत्राहुः॥ सर्वेषामेव मंत्राणामादौ अर्घ्यादिकं स्यत्॥

पश्चात्संध्याप्रयोगः॥ तदुक्तं॥ एवंल[illegible] भूतेन ऋ[illegible]ष्यादिस्मरणे सह सर्वेषामेव मंत्राणां
मनंतर्यं न्यायागतं बाध्येत॥ ॐकारस्य सप्तव्याहृतीनां सावित्र्याः शिरसश्च ऋष्यादि
कं स्थानान्तरे योगियाज्ञवल्क्येन कथितमिति कथनं तत्पूर्वभावः॥ किं वा अघमर्ष
णसूक्तस्य ऋष्यादिकं प्रथममुक्तं तदेव प्रथमं स्यात्॥ तस्मान्नात्वेति प्रयोगाद्बहिरी
नं प्रयोगकाले सौकर्यार्थं॥ अथवा॥ ज्ञात्वोपासयेदिति प्रत्येकमभिसंबध्यते तेन
तत्तन्मंत्रस्य ऋष्यादिकं तन्मंत्रप्रयोगात्प्राक् ज्ञातव्यमिति सिध्यति॥ प्रणवव्याहृति
सावित्रीशिरसां च मिलितानामेव प्राणायामे विनियोग इति तेषां मिलितानामे ऋष्यादि
कं स्यात् प्राणायामः॥ ॐकारस्य श्वेतवर्णकथनं सावित्र्याश्चाग्निमुखकथनं स्तुतिः॥ वि
नियोगाभावात्॥ आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन
विशेषत इत्यादिना नानास्थानेषु चतुर्णामेवाभिधानात्॥ अत्र ऋष्यादिस्मरणोपाठि

(81)

आ०
३०

मेणाऽऽसन्ध्यादिचतुष्कपनं॥ एवंपंचविधं
कएवक्रमोग्राह्यः स्थानान्तरेष्वप्पनेनैवक्रमेणाऽऽसन्ध्यादिचतुष्कपनं॥ एवंपंचविधं
योगंजप्यकालेष्वनुस्मरेत्॥ होमेचान्त्यकालेयोगेस्वाध्यायप्रजनेतथेति॥ वर्णान्तर्भा
वेनपंचविधत्वंप्रकारान्तरं॥ अधिकफलार्थंवा॥ इदंआसन्ध्यादिस्मरणंपत्रमंत्रेप्राणायामा
कंततः प्राक्प्रयोगएववक्तव्यं॥ संध्योपक्रमेन्यासः॥ स्मृत्वोङ्कारंचगायत्रींनिबध्नीयाच्छि
खांततः॥ पुनराचम्यहृदयंनाभिंस्कंधौचसंस्पृशेत्॥ यदितस्मिन्कालेमुक्तशि
खःस्यात्तदानेनमंत्रेणशिखांवध्वाऽऽचमेदित्यर्थः॥ नतुसमंत्रकत्वार्थंपूर्वबद्ध
शिखामोचनीयेतिभ्रमःकार्य्यः॥ छन्दोगपरिशिष्टे॥ सव्येपाणौकुशान्कृत्वा
कुर्य्यादाचमनक्रियां॥ सव्यः सोपग्रहःकार्य्योदक्षिणःसपवित्रकः॥ सोपग्रहइतिकु
शान्कृत्वेतिपूर्वोक्तकुशत्रयसमीपेऽग्निमकर्मोपयुक्तकुशाधर्त्तव्याइत्युक्तं॥ त
त्रकुशस्याकोंसितत्वात्॥ उपग्रहातइत्युपग्रहइतिव्युत्पत्तिसंभवाच्च॥ पवित्रंअनन्त

र्जर्मिरांसाग्रंकौशंद्विदलमेवच॥ प्रादेशमात्रंविज्ञेयंपवित्रंयत्रैंविदि त्यनेनैवलक्षितम्
न्स्वाः प्रवरणीयाः स्युः कुशाश्चैवास्तुवर्हिषः दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मणि॥ अ
स्यार्थः॥ यतः प्रवरणादौ न्स्वादिविधिः॥ अतः संध्यादौ विशेषविध्यभावाद्दर्भमात्रमेवां
ग॥ नतुपवित्रलक्षणमेतत्॥ पूर्वलक्षणवाधात्॥ अतइत्यन्वयात् वाक्यभेदापत्तेश्च॥
अतएवाचमनात्प्रागेवपवित्रधार[illegible]णं॥ आचम्यप्रयतोनित्यंपवित्रेणद्विजोत्तमः
नोच्छिष्टस्तुभवेत्तत्रभुक्तशेषंतुवर्जयेदिति लघुहारीतदर्शनात्॥ आग्निमज्जपोपयुक्त
कुशत्रयधारणमपिदक्षिणकरेपवित्रधारणावसरएवकुर्वंति॥ अनिरुद्धंचैतत्॥ ल
घुहारीतः॥ दर्भहीनातुयासंध्यायच्चदानंविनोदकं॥ असंख्यातंचयज्जप्तंतत्सर्वंनिष्फलं
भवेत्॥१॥ योगियाज्ञवल्क्यः ऐशान्याभिमुखोभूत्वाशुचिः प्रयतमानसः आचान्तःपुन
राचमेद्दतमित्यभिमंत्र्यच आन्तरंशुध्यतिह्येवमन्नपानमशीहृतं॥ तथा॥ पूर्वासंध्यातु

गायित्री सावित्री मध्यमाह्कृता॥ याभवेत्पश्चिमासंध्या सा विज्ञेया सरस्वती॥ रक्ताभवति गायि
त्री सावित्री शुक्लवर्णिका॥ कृष्णा सरस्वती ज्ञेया संध्यात्रयमुदाहृतं॥ कामधेन्वादौ॥ श्वेताभ
भवति गायित्री सावित्री रक्तवर्णिकेति पाठः॥ एतच्च संध्यात्रयरूपकथनं ध्यानार्थं स्तुति
मात्रम्वा॥ गायत्री च संध्यात्रये पि शुक्लवर्णैव ध्येयेति वक्ष्यते॥ यासंध्या सा च गायत्री त्रिधा
भूत्वा व्यवस्थितेत्यभेदाभिधानं स्तुतिः॥ पारमार्थिके प्यभेदे जपोपक्रमे शुक्लाएव ध्यातव्या
वृहस्पतिः॥ वध्वासनं निपम्य स्वं स्मृत्वा ऋष्यादिकं ततः। सन्निमीलित दृष्टो नो प्राणाया
मान्समभ्यसेत्॥ आसनं पद्ममर्द्धासनं वा पितयास्वस्तिकमासन समिति वायुपुराणोक्तं
स्वं आत्मानं नियम्यास्मृतिति पाठे प्राणायामपदं मंत्रपरम्॥ अत्र कंम्देग परिशिष्टे॥
रक्षान्तेवारिणात्मानं परिक्षिप्य समन्ततः रक्षा कार्य्येति शेषः॥ अन्त शब्दस्यादावपिश
कृत्वात्॥ शिष्टाचारानुरोधात्॥ प्राणायामादावियं रक्षा कार्य्या इत्याहुः कामधेनौ तु

प्राणायामा नन्तरमेव लिखनं॥ शंखवशिष्ठांगिरो बृहस्पति पैठीनसि बौधायनाः॥ स व्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥ त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥ व्याहृतं वैतच्छन्दोग परिशिष्टे॥ भूराद्यास्तिस्र एवैता महाव्याहृतयो व्ययाः॥ महर्जनस्तपः सत्यं गायत्री च शिर[illegible]स्तथा॥ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरिति शिरः प्रतिप्रतीकं प्रणवमुच्चारयेदन्ते च शिरसस्तथा॥ एता एतां सहानेन तथैभिर्दशभिः सह॥ त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते॥ प्रति प्रतीकं सप्त व्याहृतीनां गायत्र्याश्च शिरश्चांसे सावित्र्यर्थः॥ एवं शिरोन्त प्रणवमादायैष्वाभवन्ति॥ एता व्याहृतीः एतां गायत्रीम्॥ अनेन शिरसा· एभिः प्रणवैः॥ आयतप्राणः नियतवातः। नियमश्च· पूरके· आदानमेव· कुंभके धारणमेव· रेचके त्याग एवेत्येवं रूपः॥ यो

85

आ०
३९

याज्ञवल्क्यः पूरककुंभकरेचकैः प्राणायामस्त्रिलक्षणो ज्ञेयः॥ एतच्च योगियाज्ञवल्क्यस्य
पौर्वापर्य्यपरामर्षाद्युक्तं॥ एवं च प्रत्येकमेव प्राणायामत्वात्॥ प्रत्येकमेव त्रिरावृत्त
मंत्रपाठः॥ एतावतैव प्राणायामत्रयसिद्धिः॥ अत एव ततोऽन्तः शुध्यति त्रिभिरित्यु
पसंहारः॥ आदानं रोमधुत्सर्ज्जे वायोस्त्रिस्त्रिः समभ्यसेदिति व्यासोक्तो नवधाभ्यासः
पक्षान्तरः॥ त्रिविधं केचिदिच्छन्ति तथैव नवधापरे इत्यनेनाप्यभिधानात्॥ तथा॥ ना
सिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते कुंभको निश्चलश्वासो रेच्यमानस्तु रेचकः॥
नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितं॥ चतुर्भुजं महात्मानं पूरके णैव चिन्तये
त्॥ कुंभकेन हृदि स्थाने ध्यायेच्च कमलासनं॥ प्रकारमाह छन्दोपरिशिष्टे॥ शिर
सो मार्ज्जनं कुर्य्यात्॥ कुशैः सोदकविन्दुभिः॥ यत्तु योगियाज्ञवल्क्येन साईद्यावाधःप्र

क्षिप्य साद्र्द्धपोऽद्धं तु प्रक्षिपेदिति अत्र च विभाग उक्तः स प्राचीन मार्ज्जने॥ एवं समार्ज्जनं कृत्वा
बाह्यशुच्यर्थं कारणं॥ अथवाभ्यन्तरशुच्यर्थं प्राणायामान् समभ्यसेदित्युपसंहारात्॥ एत
च्च मार्ज्जनं स्नानासामर्थ्ये संध्यानुकूलशौचार्थमेव॥ बाह्यशुच्यर्थं कारणमिति श्रव
णात्॥ अधिकफलार्थं वा॥ अत एव बहुभिरनुष्ठानमनावश्यकत्वात्॥ कस्मान्तरं चेति
परिभाव्यं॥ प्राणायामानन्तरं मार्ज्जनं संध्यान्तर्गतमिति दर्शितमेव॥ अयमपि संध्या
मंत्रक्रमेण प्राणायाममंत्रानन्तरं मार्ज्जनमंत्रमाह॥ ॐकारव्याहृतीः सम्यक् गायत्रीं॥
शिरसा सह॥ आपोहिष्ठा अचतिस्रः सूक्तं चैवाब्दमर्षणमिति॥ अत्र यद्यप्यापोहिष्ठा
नन्तरमब्दमर्षणसूक्तं चोक्तं॥ तथापि मध्ये द्रुपदा बोद्धव्या॥ सर्वत्र मार्ज्जनं कर्मस्वालिं
गानामुदाहृतमित्यनन्तरं द्रुपदा अष्यादिके मुक्त्वा अपः पाणौ समादाय त्रिः पठेद्रुप

श्रा०
४०

दाम्नचं॥ तत्तोयं मूर्ध्नि संन्यस्य सर्वपापैः प्रमुच्यते· इति द्रुपदाप्रयोगमुक्त्वा॥ एवंस्नात्वा त्वातुमं
त्राणामित्यादिना संध्याभिधानात्॥ एवं चोक्तमेव द्रुपदाप्रयोगः॥ संध्यापांगत्वाद्यः॥ प्रक
रणान्तरे प्रमाणाभावात्॥ अघमर्षणप्रयोगस्तु छन्दोगपरिशिष्टे दर्शितः करेणोद्धृत्यश
लिलं घ्राणमासाद्य तत्र च॥ जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणमिति· अनायतासुर्वे
तिविकल्पवचनादायतासुर्वा॥ शंखः॥ उपस्थानं ततः पश्चान्मंत्रेणानेन धर्मतः॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः॥ त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोमृ
तं· प्राणायामानन्तरमाचमनविधानादायतासु पक्षेपीरखोक्तमाचमनमुपसंहर्त्त
व्यमिति केचित्॥ एतच्च वाचमनं मार्जनानन्तरं श्रुतमपि अघ्यरोन्तेक्ताघमर्षणानंत
रमनुष्ठेयं॥ शंखेनाप्यनन्तरं श्रुतमपि सूर्याञ्जलिदानाभिधानात्॥ उपस्थाना

87

त्राकछंदोगपरिशिष्टे ॥ उत्थायार्कं प्रति प्रोहेत्त्रिकेणाञ्जलिमम्भसः ॥ प्रोहं पेत्त्रिकेणाप्र
णवो भूर्भुवःस्वश्च सावित्री च तृतीयका ॥ इत्यनेन प्रागुक्तेन ॥ अञ्जलिमित्येकत्वस्याविव
क्षितत्वाञ्जलित्रयदानमप्युदं ॥ कात्यायनः ॥ पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्य्य
मुदीक्षेत् ॥ उदुत्यमुदुत्यं चित्रं तच्चक्षुरिति ॥ गायत्र्या च यथाशक्ति । अत्र मध्याह्ने सूर्य्याञ्जलौ
सजलपुष्पस्रवणाद्विन्नुपुराणादौ तोयमात्रस्रवणमुपलक्षणं प्रातःसायंविषयं वा ॥ त
थाचा तैत्तिरीयश्रुतिः ॥ ब्रह्मवादिनः सूर्य्याभिमुखाः संध्यायां गायत्र्याभिमन्त्रिता अप ऊर्ध्वं
विक्षिपन्ति ताः एता आपो वज्रीभूता स्तानि रक्षांसि मन्देहारुणे द्वीपे प्रतिक्षिपन्ति यत्प्रदक्षि
णं प्रक्रामन्ति तेन पापमवधुन्वन्ति ॥ उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् ॥ ब्राह्मणो वि
द्वान्सकलं भद्रमश्नुते तथा चोर्ध्वबाहुत्वविधानात् ॥ तदसंसक्तपार्ष्णिर्वा एकपादर्धपा
दान्सकलं भद्रमश्नुते तथा चोर्ध्वबाहुत्वविधानात् ॥ इति छन्दोगपरिशिष्टोपानामुपस्था
दपि ॥ कुर्यात्क्षतांजलिं चापि ऊर्ध्वबाहुरथापि वा ॥

प१

नेकृताञ्जलित्वंसायंप्रातर्विषमेवउदीक्षितेतिसूर्य्याभिमुखत्वेतात्पर्य्यं।।तेनमेघावि
छन्नेपिसंमुखउपतिष्ठेत्।।उपस्थापेत्युपसंहारात्।।गायत्र्याचजप्येवोपस्थानं।।मंत्र
प्रकरणंहित्वानमुपस्थानं।।तच्चजपेसंभवति।अनर्थपरएवोच्चारणोजपपदमितिप्रायि
कं।मंत्रार्थपरत्वेप्रमाणाभावात्।।अतएवयथाशक्ति इति नानाजपसंख्यासंभवा
त्।पुनश्चैतत्।यच्चकात्यायनेनजपविधानात्।।अषंतरसंवधाच्चेति।।यत्तुवत्स्यः
स्नानमष्टेवतेर्मंत्रैर्मार्जनंप्राणसंयमः।।सूर्य्यस्यचाप्युपस्थानंगायत्र्याःप्रत्यहंजपः
मार्जनप्राणसंयमयोःपाठक्रमोगन्तव्यः प्राणायामादेःसंध्याप्रयोगोपलक्षण
त्वात्।।एवंकात्यायनेनापिप्राणायामानन्तरमुपस्थानाभिधानंसंक्षेपात्।।गाय
त्रीजपेयोगियाज्ञवल्क्यः प्रणवोभूर्भुवःस्वश्चत्रीणिगानिहृदयादयः।त्रिरावर्त्यंत
तः पश्चादार्षंछंदश्चदैवतं।विनियोगस्तथारूपंध्यानत्रयंक्रमशस्तुवै।रूपमाह

(89)

राम०

४२

श्वेतवर्णा तु समुद्दिष्टा कौशेयवसना तथा॥ श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता॥ आ
दित्यमंडलस्था सा च ब्रह्मलोकगता॥ पव॥ अक्षसूत्रधरा देवी पद्मासनगता शुभा॥ आ
वाहयज्नुषाने न तेजोसीति विधानतः॥ तत्रावाह्य जपित्वा तु नमस्कृत्य विसर्जयेत्॥ ग॥
पत्रीमधिकृत्य शत्यपश्रुतिः॥ तस्या उपस्थानं॥ गाय त्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्य
पदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो माप्रापदिति॥ यं द्वि
ष्याद् सावस्मै कामो मा समृद्धीति॥ न ने है वास्मै स कामः समृध्यते॥ पस्मा एवमुपति
ष्ठते महदः प्राप इति वा॥ उपस्थानं चैतत्॥ जपात्प्राक्॥ तथा च बौधायनः उपतिष्ठेद्वा
एतां देवीं तुरीयेन पदेन॥ अथाप्युदाहरन्ति॥ गायत्र्यस्येक पदी द्विपदी त्रिपदी चतुः
पद्य पदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे इत्युपविश्यांजपती
ति॥ अथापीत्यादिना तुरीयाय पदस्वरूपकथनं॰ एवं च श्रुतावपि परोरजस इत्यंतो मंत्रः

आ॰
४२

अग्रे चार्थवादः॥ इदं च बौधायनवाक्यं राजाद्यलिखितमपि बहुमहाजनसम्मतत्वाल्लिखि
तं॥ जप्यमाह योगियाज्ञवल्क्यः॥ ॐकारः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परं॥ गायत्री प्रणव
श्चान्ते जप्ये ह्येवमुदाहृता॥ एवं गायत्र्या दौ तृतीयोङ्कारोच्चारणमन्तिमोंकारत्याग
श्चायुक्तः॥ मन्वादावप्यन्तिमोंकारान्तर्भावसंभवात्॥ यमः॥ सहस्रपरमां
देवीं शतमध्यां दशावरां॥ गायत्रीं च जपेन्नित्यं सर्वपापप्रणाशिनीं॥ १॥ अ
त्र बौधायनः॥ शतकृत्वोऽपरिमितिकृत्वो वा दशावरां अपरिमितकृत्वो
दशोपरि शतान्तावर्त्या नियतसंख्यमित्यर्थः॥ गोभिलः॥ कदाचिदपि नो विद्वा
न् गायत्रीमुदके जपेत्॥ गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्थाय तां जपेत्॥ बृ
हस्पतिः॥ मार्जनं जलमध्ये तु प्राणायामो यतस्ततः [illegible] उपस्थानं ततः
पश्चात्सावित्रीजप उच्यते॥ मार्जनमंत्रस्थानां गर्भतमपेक्षितं॥ यतस्त

तः जलेस्थले च॥ एवं च प्राणायामस्य संध्यान्तर्गतस्य जलेस्थले च विधानादुप

स्थानपर्य्यान्ता संध्या जलेप्य स्यमते॥ गायत्रीजपस्तु स्थलएवेत्युक्तं॥ कात्याय

नेनोक्तौ यं प्राणायामादिकमुक्तं॥ नरसिंहपुराणेपि॥ स्नानोनन्तरं तर्प्पणान्तमु

क्तं॥ दर्भेषु दर्भपाणिः सन्ध्याङ्मुखः सुसमाहितः॥ प्राणायामांस्तु कुर्वीत यथाशा

स्त्रमतंद्रितः॥ जपेदहरहः स्नात्वा सावित्रीं जपविद्द्विजः॥ अर्घ्यपुष्पाञ्जलिं क्षित्वा

भावनेचोर्द्ध्वबाहुकः॥ उँ तत्पेच जपेन्मंत्रं चित्रं तच्चक्षुरित्यपि॥ प्रदक्षिणामुपावृत्य

नमस्कृत्य ततः प्रभुमिति॥ अत्र दर्भेष्विति श्रवणात्स्थल एव संध्याकरणमुक्तं

जपानन्तरमुपस्थानं प्रकारान्तरमेतत्॥ बोधायनेपि दर्शनात्॥ हारीतः॥ प्रणवो

व्याहृतिः सावित्रीचेति॥ सावित्रीं जपन्पापेभ्यो मुच्यते॥ शतं जप्त्वा मानसात्पूतो

सहस्रेवा जप्त्वा वा क्रापात्पूता भवति१

यथा सावित्रि जप्येन सर्वपा
भवति॥ यम:॥ न तथा वेद जप्येन पापं निर्हृ हतिद्विजः॥ यथा सावित्रि जप्येन सर्वपापैः प्रमुच्यते॥ अथ जपविधिः॥ तत्र शंखः॥ कुशा वृष्यां समासीनः कुशोत्तरीयो वा कुशपवित्रपाणिः पूर्वमुखः सूर्याभिमुखो वाक्षमालामादाय देवतां ध्यायन्
जपं कुर्यात्॥ सुवर्णमणिमुक्ताफलस्फटिकपद्मबीजरुद्राक्षेन्द्राक्षपुत्रंजीवकानामन्यतमामक्षमालां कुर्यात्॥ कुशाग्रैर्वा ग्रंथितां वा॥ हस्तोपयामैर्वा गणयेत्॥ यत्र न देवताविशेषविधिस्तत्रापि मंत्रप्रकाश्या देवता ध्येया॥ हस्तोपयामः अंगुलीनमनं॥ देवतां ध्यायन्निति देवताध्यानस्य जपांगत्वविधानात्॥ दिशमाह
योगियाज्ञवल्क्यः॥ गृहे त्वेकगुणं जप्यं नद्यां तु त्रिगुणं स्मृतं॥ गवां गोष्ठे शतगुणमग्न्यागारे शताधिकं॥ सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ॥ सहस्रश

रामं०

४२

९३

रत्युपसंहारात्॥ अतो न पौराणिकादिमंत्रजपे निषेधः॥ याज्ञवल्क्यः॥ यज्ञानां तपसां चै
व शुभानां चैव कर्मणां॥ वेदएव द्विजातीनां निःश्रेयसकरः परः॥ विष्णुः॥ स्नातः पवित्रपा
णिर्यथाशक्ति जपेत्॥ विशेषतः सावित्रीं पुरुषसूक्तं वा नैताभ्यामधिकमस्ति॥ शंखः॥
नाघमर्षणात्परमन्तर्जले न व्याहृतिभ्यः परं होमे न सावित्र्याः परं जपे॥ मनुयमशंखवशि
ष्ठहारीतयोगियाज्ञवल्क्याः॥ जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः॥
अंगिराः॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः॥ वाङ्मयं प्रणवः स
र्वमभ्यसेत्प्रणवं ततः॥ नरसिंहपुराणे॥ त्रिविधो जपयज्ञः स्यात्तस्य भेदं
निबोधत॥ वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः॥ त्रयाणां जप
यज्ञानां श्रेयान्स्यादुत्तरोत्तरः॥ यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः
मंत्रमुच्चारयेद्व्यक्तं जपयज्ञः स वाचिकः॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ

राम०
४४

(९५)

तकोटीनाममनन्तंशिवसंनिधौ॥तथा॥तिष्ठंश्चोदीक्षमाणोर्कं जपंकुर्य्यात्समाहितः॥अ
न्यथाप्राङ्मुखःकुर्य्यात्पक्ष्ममाणाक्रमेणतु॥प्राक्कूलेषुकुशेष्वेवआसीनश्चासनेशुभे
नात्युच्छ्रितेनातिनीचेदर्भपाणिःसुसंयतः॥स्फटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः
अक्षमालाह्निकर्त्तव्याउत्तमाउत्तरोत्तरा॥प्राक्कूलेषुप्रागग्रेषु॥दीर्घकालीनफलार्थंज
पेभक्ष्यमाह॥शाकपावकभैक्ष्याणिपयोमूलफलानिच॥ दधिसर्प्पिस्तथाह्यापःप्रश
स्तं ह्युत्तरोत्तरं॥एतान्यनुव्रतान्याहुःप्रशस्तानिजपकर्म्मणि॥पुनर्भक्ष्यापादानंप्रशंसा
र्थं॥अत्रशाकादीनांविकल्पःस्यात्॥भक्ष्यविशेषेणाजपारंभएकादश्युपवासोपिनकर्त्तव्य
इतिहरिहरः॥एतान्यनुव्रतानीत्युपसंहारादितरव्यावृत्तौतात्पर्य्यं॥एषांतुविकल्पःस
मुच्चयोवेतिनाख्या॥जप्यमाहमनुः॥वेदमेवजपेन्नित्यंयथाकालमतंद्रितः तंह्यस्याहुःपर
मधर्म्ममुपधर्म्मोन्यउच्यते॥वेदमेवेत्यावश्यकत्वाभिप्रायंफलाधिक्यार्थंवा॥परमोधर्म

प्रचालयेत्· किंचिद्व्यक्तं स्वयंविद्यादुपांशुः सजपः स्मृतः॥ध्येयायदक्षरश्रेणीवर्णा
द्वर्णंपदात्पदं॥शब्दार्थानुचिन्तनाभ्यासः सउक्तोमानसोजपः॥एवंचत्रिविधस्यापिज
पस्यविधानात्॥नोच्चैर्जप्यंबुधःकुर्यात्साविस्याश्चविशेषतः इति शंखोक्तमत्स्यपु
राणाभिप्रायं॥ध्यायेन्मनसामंत्रान्जिव्हौष्ठौनविचालयेत्॥नकंपयेच्छिरोग्रीवंद
न्तान्नैवप्रकाशयेदिति योगियाज्ञवल्क्यः॥नवक्रं मन्त्रंचहसन्नपार्श्वमवलोक
यन्॥नापाश्रितोनजल्पंश्चनप्रावृताशिरास्तथा॥नपदापादमाक्रम्यनचैवहि
तथाकरौ॥नचासमाहितमनानचसंश्रावयन्जपेत्॥नाक्लिन्नवासाःस्थलगो
जपादीनाचरेद्बुधः॥व्रतादतेनार्द्रवासानैकवासाःसमाचरेत्॥नजीर्णेनमलिने
ननपरिक्लिष्टे नवाजपेत्॥यस्माद्राक्षसभूतानिसिद्धविद्याधरोरगाः॥हरन्तिप्र

ट

प्राभंयस्मात्तस्मात्कृच्छ्रं समाचरेत्॥ जपकाले न भाषेत व्रतहोमादिकेषु च॥ एतेष्वेवाव
सक्तस्तु पथागच्छेद्द्विजोत्तमः॥ अभिपतुतं विप्रं योगक्षेमं तु कीर्त्तयेत्॥ तूष्णीमासी
त पाषंडचांडालपतितादिकान्॥ दृष्ट्वा तान्वार्युपस्पृश्य भाष्यस्नात्वा पुन
र्जपेत्॥ नतथैव करौपदा आक्रमेत्पर्थः॥ एतेष्वेवावसक्तः जपादिप्रवर्त्तं॥ तथा
परिवाप्यमलोपः स्याज्जपादिषु कर्पं चन॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं
बौधायनः॥ कषायवासाः कुरुते जपहोमप्रतिग्रहान्॥ न तद्देवं भवेत्कर्म्महव्यकव्य
मथो हविः॥ व्यासः॥ आर्द्रवासास्तु यः कुर्याज्जपहोमप्रतिग्रहान्॥ सर्वं तद्राक्षसं
विद्याद्बहिर्जानु च यत्कृतं॥ वशिष्ठः॥ जपहोमोपवासेषु धौतवस्त्रधरो भवेत्॥ अलं
कृतः शुचिर्म्मौनी श्राद्धादौ विजितेंद्रियः॥ लघुहारीतः॥ जपे होमे तथा दाने स्वाध्या

विधा

येपितृतर्प्पणे॥ अभ्यन्तु करे कुर्य्यात्सुवर्णेन कृतैः कुशैः॥ तथा॥ वितो दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु॥ स्तरणासनपिण्डेषु षट्कुशान्परिवर्ज्जयेत्॥ पिण्डार्थं यैस्तृता दर्भा यैः कृतं पितृतर्प्पणं॥ मूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते॥ नीवीमध्ये तु ये दर्भा ब्रह्मसूत्रे तु ये धृताः॥ पवित्रास्तेविजानीयाद्यथा कुशाः॥ अथ गृह्यपरिशिष्टे॥ अमेध्यलिप्ता ये दर्भास्तेषां त्यागो विधीयते॥ तथा॥ दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः॥ अयातयामान्येतानि योज्यानि पुनः पुनः यातयामं चिरत्तनत्वेन कर्म्मा क्षमम्॥ मरीचिः॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः॥ अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः॥ एवं च विहितो सुप्ते कुशानोत्पाटनीया इति प्रसिद्धिरसमीचीनैव॥ छन्दोगपरिशिष्टे॥ यत्रोपदिश्यते कर्म्म कर्त्तुरंगं न तूच्यते॥ दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः

आ०
४६

यत्र दिङ्नियमो नास्ति जपहोमादिकर्मसु॥ तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्यापराजि
ता॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः॥ तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता
सौम्या उत्तरा अपराजिता ऐशानी॥ तथा॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च॥ वि
शिखो व्युपवीतश्च यत्करोति न तत्कृतं॥ सदेति श्रवणात् कर्मकाले अकर्मकाले च॥
यत्र नीवीतप्राचीनावीतयोर्न्न विधिस्तत्र सार्वत्रोपवीतित्वं॥ एवं च यत्र दैवकार्ये देशे
नोपवीतित्वं श्रुतं॥ तत्रापि दैवमुपलक्षणं पितृमनुष्यकार्यातिरिक्तं वैदिकं सर्वं
दैवमिति॥ गोभिलः॥ दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्ये अंसे प्रतिष्ठापयति दक्
कसर क्षिणं मनुवलम्बं भवत्येवं यज्ञोपवीती भवति॥ सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षि
णे दक्षिणे अंसे प्रतिष्ठापयति सव्यं कक्षमनुवलम्बं भवत्येवं प्राचीनावीती भवति

यर

शौग २

मनुः ॥ निवीती कराग्रसज्जने ॥ वायुपुराणे ॥ क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः ॥ भवन्ति वृथा तस्य क्रियाः सर्व्वा न संशयः ॥ बौधायनः ॥ कर्म्मयुक्तो नाभेरधः स्पर्शनं वर्ज्जयेत् ॥ छंदोगपरिशिष्टे ॥ पित्र्यमंत्रानुद्रवणे आत्मालंभे अवेक्षणे ॥ अधोवायुसमुत्सर्गे प्रहसेऽनृतभाषणे ॥ मार्ज्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसंभवे ॥ निमित्तेष्वेषु सर्व्वेषु कर्म्म कुर्व्वन्नुपस्पृशेत् ॥ अनुद्रवणे उच्चारणे ॥ आत्मालंभे हृदयस्पर्शे ॥ अवेक्षणे हृदयस्यैव ॥ मार्ज्जारस्पर्शेऽत्र मार्ज्जारकृत एव स्वयंकृते स्नानस्योक्तत्वात् ॥ योगियाज्ञवल्क्यः ॥ रौद्रं पित्र्यं सुरात्मानं मंत्रांस्तथा चैवाभिचारिकान् ॥ व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥ पूर्व्ववाक्ये पित्र्यमंत्रानुद्रवणे आत्मालंभे चाचमनदर्शनात् ॥ अत्रापः स्पृष्ट्वा आचमनपरमेव पौर्व्यात्तिकसंप्रदाये जलस्पर्शनमात्रं येषां तु पूर्व्वत्राप्यपः स्पृशेदिति

पाठस्तेषां जलस्पर्शाय वा नादः ॥ परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत्
धर्म्मे कर्म्मणि विद्वद्भिर्वर्ज्जनीया प्रयत्नतः ॥ तथा ॥ नाचरेत्कस्यचित्पी
डां कर्म्मणा मनसा गिरा ॥ आचरन्नभिषेकं तु कर्म्माण्यन्यानि नाचरन् ॥ विधिही
नं भावदुष्टं कृतमश्रद्धया च यत् ॥ तद्धरन्त्यसुरास्तस्य मूढस्याकृतात्मनः
प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं
स्यादिति श्रुतिः ॥ अत्राध्वरेष्विति वैदिककर्म्ममात्रपरम् ॥ अथ संध्याप्रयोगः ॥
वामे वहन्कुशान्दक्षिणे पाणौ पवित्रं कुशत्रयं च धृत्वा सप्रणवगायत्र्या
शिखां बध्वा पूर्वाभिमुख आचम्य ऋतमित्यादिना जलमभिमंत्र्य पुनरा
चामेत् ॥ ततो वारिणात्मानं वेष्टयित्वा रक्षां कुर्यात् ॥ ततः ॐकारस्य ब्रह्म

(102)

ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारंभे विनियोगः॥सप्तव्या
हृतीनां प्रजापतिः ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहती पंक्तिस्त्रिष्टुब्जगत्यश्छंदांस्य
ग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्तेप्रा
णायामे विनियोगः॥गायत्र्या विश्वामित्र ऋषिर्गायत्री छंदः सविता देवता
अग्निर्मुखमुपनयने प्राणायामे च विनियोगः॥शिरसः प्रजापतिः ऋषिर्ब्र
ह्माग्निवायुसूर्या देवता यजुः प्राणायामे विनियोगः इति ऋष्यादिकं स्मृ
त्वा बद्धासनः सन्निमीलितनयनो मौनी प्राणायामत्रयं कुर्यात्॥तत्र वायोरादान
काले पूरको नाम प्राणायामः॥तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत्॥धारण
काले कुंभकः॥तत्र कमलासनं रक्तवर्णं चतुर्मुखं ब्रह्माणं हृदये ध्यायेत्॥

लि॰ पा

आ०
५८

त्यागकाले रेचकः॥ तत्र श्वेतं त्रिनेत्रं शिवं तत्तारे ध्यायेत्॥ त्रिष्वप्येतेषु प्रत्येकं
त्रिमात्राभ्यासः प्रत्येकमोंकारादिसप्तव्याहृतयः ॐकारादि सावित्री॥ ॐकार
हृदयमध्यस्थं शिरश्चेति मंत्रस्तस्य स्वरूपम्॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ तपः ॐ स
त्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धीयो यो नः प्रचोदयात् ॐ आपो ज्यो
तीरसोमृतं ब्रह्म भूर्भुवः स्वरोम्॥ ततः सूर्यश्चमेति ब्रह्मा ऋषिः प्रकृतिश्छंदः सू
र्यो देवता अपामुपस्पर्शने विनियोगः॥ ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च
मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामु
दरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सू
र्ये ज्योतिषि जुहोमि स्वाहा॥ इति प्रातराचमेत्॥ आपः पुनंतु पृथिवीं तिवि

त्सुत्रऋषिरनुष्टुप्छंदः आपोदेवता अपामुपस्पर्शने विनियोगः॥ ॐ आपः पुंतु पृथि-
वीं पृथ्वी पूता पुनातु मां पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां॥ यदुच्छिष्टमभोज्यं यद्वा
दुश्चरितं मम सर्वं पुनात्वापो असतां च प्रतिग्रहं स्वाहा॥ इति मध्याह्ने आचमेत॥ अ-
ग्निश्च मेरुद्र ऋषिः प्रकृतिश्छंदो ऽग्निर्देवता अपामुपस्पर्शने विनियोगः॥ अग्निश्च मामन्यु-
[illegible] श्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पा-
पमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दुरितं
मयि इदमाममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा॥ इति सायमाचमेत॥ ततः आपो हि ष्ठे-
त्यादि ऋचस्य सप्तभिः पदैः शिरसि अथ मनभूमौ नवमेनापि शिरसि कुशत्रयेण जलं
क्षिपेत्॥ इदमेव मार्जनं॥ आपो हि ष्ठेत्यादि ऋचस्य सिंधुद्वीप ऋषिर्गायत्री छंदः आपो

आ०
४९

देवतामार्ज्जने विनियोगः॥ ॐ आपो हि ष्ठा मयो भुवः॥ ॐ ता न ऊर्ज्जे दधातनः॥
ॐ महे रणाय चक्षसे ॐ यो वः शिवतमो रसः ॐ तस्य भाजयतेह नः॥ ॐ उशतीरिव मा
तरः ॐ यस्य क्षयाय जिन्वथ॥ ॐ आपो जनयथा च नः॥ ततः कराभ्यां जलमादा
य वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत्॥ द्रुपदादिवेति कोकिलो राजपु
त्र ऋषिरनुष्टुप्छंदः आपो देवता सौत्रामण्यवभृथे विनियोगः॥ ॐ द्रुपदादिव मुमु
चानः स्विन्नः स्नातो मलादिव॥ पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥ ततः क
रस्थजलेन नासिकाग्रं संयोज्यायतासुरनायतासुर्वा त्रिः सकृद्वाघमर्षणसूक्तस्या
घमर्षणं जपेत्॥ अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छंदो भाववृत्तो देवता अ
श्वमेधावभृथे विनियोगः ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्रिरजा

यततनोः समुद्रोर्णवः समुद्रादर्णवादधि सम्वत्सरो अजायत· अहोरात्राणि विदधद्वि
श्वस्य मिषतो वशी सूर्य्याचंद्रमसौ धाता यथापूर्व्वमकल्पयत्॥ दिवं पृथिवीं चान्तरि
क्षमथो स्वः॥ ततः ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः॥ त्वं यज्ञस्त्वं वषट्कारः
आपो ज्योती रसोमृतं इत्यनेनाचामेत्॥ तत उत्थाय॥ ॐ भूर्भुवः स्वइति गायत्र्या च सू
र्य्याभिमुखं पुष्पमिश्रं जलांजलिं क्षिपेत्॥ ततो भूम्यस्पर्शनगुल्फतलभागो वा भूमि
लग्नैकचरणो वा भूमिलग्नार्द्धचरणो वा प्रातः सायं च बद्धांजलिर्मध्याह्ने ऊर्द्ध्वबा
हुः सूर्य्यमुपतिष्ठेत एभिर्म्मंत्रैः॥ उद्वयमिति हिरण्यस्तूप ऋषिरनुष्टुप्छंदः सूर्य्यो दे
वता सूर्य्योपस्थाने विनियोगः॥ ॐ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा सू
र्य्यमगन्म ज्योतिरुत्तमं॥ उदुत्यमिति प्रस्कण्व ऋषिर्गायत्री छंदः सूर्य्यो देव

106

तासूर्य्योपस्थाने विनियोगः ॥ ॐ उदुत्यंजातवेदसंदेवंवहन्तिकेतवः दृशेविश्वायसू
र्य्यं चित्रमित्यस्य कौत्सऋषिस्त्रिष्टुप्छंदः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः ॥
ॐ चित्रंदेवानामुदगादनीकंचक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवी अन्त
रीक्षंसूर्य्य आत्माजगतस्तस्थुषश्च ॥ तच्चक्षुरितिदध्यंगाथर्वणऋषिरक्षरातीत
पुरउष्णिकछंदः सूर्य्योदेवतासूर्य्योपस्थाने विनियोगः ॥ ॐ तच्चक्षुर्द्देवहितंपुरस्ताच्छु
क्रमुच्चरत्पश्येमशरदः शतंशृणुयामशरदः शतंप्रब्रवामशरदः शतमदीनाः
स्यामशरदः शतात् ॥ ततः ॐ हृदयायनमः ॐ भूः शिरसेस्वाहा ॐ भुवः शिखायैव
षट् ॐ स्वः कवचायहुं ॥ ॐ भूर्भुवः स्वः नेत्राभ्यांवौषट् ॥ ॐ भूर्भुवः स्वः अस्त्रायफ
ट् ॥ इत्यंगानि त्रिरावृत्य पूर्वोक्तंऋष्यादिकंस्मृत्वा पूर्वोक्तरूपांध्यायत्रींध्यात्वा

१०७

राम

५०

तेजोसीतिदेवाऋषयःशुक्रं देवतंगायत्रीछंदोगायत्र्यावाहनेविनियोगः ॐ तेजोसिशु
क्रमस्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेवयजनमसि॥ इत्यावाह्य॥ ॐ
गायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसि नहि पद्यसेनमस्तेतुरीयायदर्शता
यपदायपरोरजसेसावदोम् इत्युपस्थाय॥ गायत्र्याविश्वामित्रऋषिर्गायत्रीछंदः
सवितादेवताजपेविनियोगः॥ प्रातःप्राङ्मुखो मध्याह्ने सूर्याभिमुखस्तिष्ठन्सायंप
श्चिमाभिमुखउपविष्टउक्तेजपविधिनागायत्रींजपेत्॥ जप्यस्वरूपं॥ ॐ भूर्भुवःस्वःतत्स
वितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्॥ ॐ ततः प्राणापत्याविसर्जयेत्
अथब्रह्मयज्ञः॥ तत्रकात्यायनः॥ विप्राउत्पनुवाकुरुषसूक्तंशिवसंकल्पमराउल
ब्राह्मणोरित्युपस्थायप्रदक्षिणीकृत्यनमस्कृत्योपविशेद्भैषुदर्भपाणिःस्वाध्या

आ॰
५१

पंचयपापशान्त्यादावारभ्यवेदं॥ विभ्राडित्यादिना आदित्योपस्थानंकाम्यं॥ मध्या
न्हउदयेचैवविभ्राडादीछ्यपाजपेदितिछन्दोगपरिशिष्टेदर्शनात्स्वाप्यंकुर्यादिति
शेषः॥ पपापशान्त्यादिनास्वाध्यायलक्षणांवेदंपठेदितिशेषः॥ तत्रापस्तम्बः॥ यथा
ध्यायमुत्सृजन्वाचामनसाचानध्याये॥ यथाध्यायमुत्सृजन्यद्यदधीतंतत्तत्पीत्य
जन्वाचामनसाचेत्तुभयत्र॥ अधीपीतेतिशेषः॥ एवंचानध्यायेमनसाध्यायन
विधानान्नैत्तिकेनास्त्यनध्यायोब्रह्मसंहितास्मृतामितिमनूक्तंमानसविषमेव
॥ छंदोपरिशिष्टे॥ यश्चश्रुतिजपप्रोक्तोब्रह्मयज्ञःसउच्यते॥ सचार्वाक्तर्पणात्कार
र्यः पश्चाद्वाप्रातराहुतेः॥ वैश्वदेवासनेवानान्यत्रनैनिमित्तकात्॥ अतेनिमित्तका
त्॥ जलस्थलतर्पणादिकनिमित्तंविना॥ याज्ञवल्क्यः॥ वेदाथर्वपुराणानिसेतिह

(१०७)

सानिशक्तितः॥ जप्य यज्ञार्थसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्॥ अत्रेयं व्यवस्था॥ स
मस्तवेदाध्यायिना आदावरण्यवेदपाठेन स्वाध्यायः कर्त्तव्यः॥ एकदेशाध्यायिना पुरुषसू
क्तादिपाठेन सावित्रीमात्राध्यायिना प्रणवादिपाठेनेति॥ अथ तर्प्पणं॥ तत्र शाता
तपः॥ तर्प्पणं तु शुचिः कुर्य्यात्प्रत्यहं स्नातको द्विजः॥ वेदेभ्यश्च ऋषिभ्यश्च यथा
क्रमम्॥ प्रत्यहमिति वचनान्नित्याधिकारः॥ तदुक्तं छन्दोगपरिशिष्टे॥ तस्मात्
सदैव कर्त्तव्यमकुर्वन्महतैनसा॥ युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्त्ति हि
विष्णुपुराणे॥ शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्प्पणं॥ तेषामेवाहितीर्थेन कुर्वी
त सुसमाहितः॥ तेषां देवर्षिपितॄणां॥ ऋषितीर्थमंगुल्यग्रमात्रमिति बोधा
पनेनोक्तं विष्णुः॥ स्नातश्चार्द्रवासा देवर्षिपितृतर्प्पणमंभःस्थ एव कुर्य्या

त्॥ परिवर्त्तितवासाश्चेत्तीर्थे तीरमवतीर्य्य॥ अत्र भंस्य मति छंदो पक्षे कात्याय
नादिभिरुत्तीर्य्येत्यनंतरं विधानात्॥ स्थले शे वा न पक्षे वा॥ तदाह योगिया
ज्ञवल्क्यः॥ पत्राभुविस्य लं वा स्था सुदके देवता पितृन्॥ तर्प्पयेत्तु यथा
काममप्सु सर्वं प्रतिष्ठितं॥ फलार्थमपि जले तर्प्पणमाह॥ कार्ष्णाजिनिः
आपो देवगणाः सर्व्वे आपः पितृगणाः स्मृताः॥ तस्माज्जलेज्जलं देयं पि
तृभ्योस्त्वमक्षयं॥ तथा॥ देवतानां पितॄणां च जले दद्याज्जलांजलिं॥
असंस्कृत प्रमीतानां स्थले दद्याज्जलांजलिं॥ एवं च जलतर्प्पणपक्षेण ॥३ राम०
संस्कृत प्रमीतानां स्थल एव दानं॥ अत्र च जलतर्प्पणपक्षे उपस्थानप
र्य्यंता संध्या जले॥ ततस्तर्प्पणमात्रं॥ ततउत्तीर्य्य गायत्रीजपो ब्रह्मय ५२

111

ज्ञश्च॥ तर्प्पणानन्तरमपि ब्रह्मयज्ञस्यनरात्तिं हृपुराणादौ दर्शनात्॥ वैश्वदेवावसा
नेवासोस्तु॥ हारीतः॥ देवाश्च पितरश्चैव कांक्षन्ति सरितं प्रति॥ अदत्ते तु निराशा
स्ते प्रतियान्ति यथागतं॥ अदत्ते उदक इति शेषः॥ पितृगाथा ह्युयमः॥ अपि नः स
कुले जायाद्यो नोदद्याज्जलांजलिं॥ नदीषु बहुतोयासु शीतलासु विशेषतः
शंखलिखितौ॥ वापीतडागोदपानेषु सप्तमं च त्रीन्वापीराजनुद्धृत्य देवपितृंस्त
र्प्पयेत्॥ अयं वाप्यादो यथासंख्येन सप्तपिण्डोद्धारः॥ असामर्थ्यादिना स्नाना
भावे पितर्प्पणांगत्वात्॥ स्नानं न पसेतु स्नानस्य पूर्वं प्रवृत्तत्वात्॥ स्नानांगतर्प्प
णा नैव प्रसंगात्॥ स्वतंत्रतर्प्पणाधिकारसिद्धिः॥ अतो न पश्य किंपिण्डोद्धारः॥
एकप्रयोगत्वात्॥ तदाह योगियाज्ञवल्क्यः॥ उपस्थानादिभिस्तासां मंत्र

वानुकीर्त्तितोविधिः॥ निवेदनान्तं स्नानमित्याहुर्ब्रह्मवादिनः॥ उपस्थानं॥ उ
रूहीत्यादिमंत्रैः॥ तासामपां निवेदनं देवा गातुविद इति मंत्रेणावश्यमाणे[illegible]
एवं च मध्याह्नसंध्यायां स्वतंत्रायामपि स्नानप्रयान्तभावः॥ अत एव लौकि
कैः स्नानसंध्यककर्म्मणोनैरंतर्य्येणानुष्ठानं॥ योगियाज्ञवल्क्यः॥ आवाह
पूर्व्ववन्मंत्रेणास्तीर्य्य च प्राचीनकुशान्॥ प्रागग्रेषु सुरान्सम्यग्दक्षिणाग्रेषु
वै पितॄन्॥ पूर्व्ववत्तर्प्पयेदिति संबंधः॥ तेन पितृतर्प्पणेपि अंकारस्तृप्यतामिति
च लभ्यते॥ मंत्रैरूहीरितामित्यादिभिः॥ कल्पतरुकारस्तु पूर्व्ववन्मंत्रैः॥ याज्ञ
वल्क्यपूर्वसंहितास्थावाहनमंत्रेणावाह्येति संबंध इत्याह॥ तदयुक्तं॥ योगि
शास्त्रं च यत्स्वयोक्तमिति संहितान्तरेऽभिधानात्॥ योगियाज्ञवल्क्यसंहितैव

राम०

५३

पूर्वोपात: स्नानमं देवते र्मंत्रैर्प्यस्वयोक्तं पुराने ष्वेति च ग्रंथान्तरमाह ॥ अत्रापि पू

र्वोध्यायेभिधानात् ॥ किंच ॥ विश्वदेवास इति स्म चाउशान्त स्त्विस्म चेति मंत्र द्वयस्यैव

वाहनत्वात् ॥ मंत्रैरितिवकुत्वं दुर्लभं ॥ विश्वेदेवास इत्यादि मंत्रस्य ब्रह्मादिक प्रका

शनसामर्थ्यमपि नास्तीत्युक्तेव व्याख्या ॥ तथा च कार्ष्णाजिनिरावाहन मंत्र मा

ह ॥ नाभिमात्रे जलेस्थित्वा चिन्तयेदूर्ध्वमानसः ॥ आगच्छन्तु मे पितर इमं गृह्णन्त्वपो

ञ्जलिमिति ॥ एवं च देवावाहनमपि देवा आगच्छन्त्विति कर्त्तव्यम् ॥ पित्रावाहनमे

वात्र मंत्र दर्शनाद् वाच्येतितत्पर मेव ॥ यमः ॥ भूमौ यद्दापोदीयन्ते दातावैवजले

स्थितः ॥ वृथा तद्धीयते तोयं नोपतिष्ठति कस्यचित् ॥ एतेन जलस्थो जलएव त

र्पणां जलेंक्षिपेदित्युक्तं ॥ स्थलेएव तर्पणं व्यामित्याह ॥ शंखः ॥ नोदकेषु न पात्रेषु न

त्रुद्धो नैकपाणिना ॥ नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते ॥ वौधायन मते स्थ

स्थेन स्थले २

त्रस्थलेनापिजलएवतर्प्पणंजलंप्रक्षेप्तव्यं॥नोपतिष्ठतितत्तोयंयत्त्रभूमौप्र
दीयते॥बौधायनमतेस्थलस्थेनापिजलएवतर्प्पणंजलंप्रक्षेप्तव्यं॥व्यासः॥प
रिधानानन्तरमप्सुतर्प्पणविधानात्॥हरिहरस्तुजलसमीपस्थेनतर्प्पणंजले
जलएवप्रक्षेप्तव्यं॥यदाचोद्धृतजलेनतर्प्पणंतदास्थलेस्थलएवतर्प्पणंजलप्रक्षे
पः॥तद्विषयमेवप्रागग्रेषुसुराणित्याह॥तदप्युक्तं॥उदकेनोदकंकुर्य्यात्स्थितःस्थ
लेचकारावन॥उत्तीर्य्यचशुचौदेशेकुर्य्यादुदकतर्प्पणमितिशंखेनजलस्थतर्प्प
णंनिवार्य्यशुचौदेशेतर्प्पणंविधायनोदकेष्विति पुनरुदकनिषेधः॥तीरस्थस्या
जलप्रक्षेपेकृतमितितन्मते॰स्थलस्थेनसर्वत्रस्थलएवतर्प्पणंजलप्रक्षेप्तव्य
मितिबौधायनमतेस्थलस्थेनजलेजलप्रक्षेपइतिकल्पद्वयमेवेति॥सुमन्तुः॥आ
काशेतुक्षिपेद्वारिजलस्थोदक्षिणामुखः॥आकाशेजलोपर्य्येव॥योगियाज्ञ

राम॰
५४
115

वल्क्यः ॥ यद्युद्धृतं प्रसिंचेद्दै तिलान्संमिश्रय ज्जले ॥ अतोन्यथातु सव्येन तिलाग्नाह्याविचक्षणेः ॥ अस्यायमर्थः ॥ यद्युद्धृतोदकमादाय तर्प्पणं करोति तदा जलपात्रे तिलाः प्रक्षेप्तव्याः ॥ यदातु जलाशयस्थः ॥ तदा जलमादाय वामहस्तेन तिलग्रहणं ॥ मरीचिः ॥ तिलानामप्यभावे तु सुवर्णरजतान्वितं ॥ तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनः ॥ अत्र पूर्वपूर्वाभावे उत्तरोत्तरविधिरिति ॥ भ्रमो वाक्यान्तरविरोधान्स्पष्टव्यः ॥ किंतु तिलादीनां समुदितानामभावे एकदेशोपादानप्रदर्शनमिदं ॥ एवं च ॥ विना रूप्य सुवर्णेन विना ताम्र तिलैस्तथा ॥ विना दर्भैश्च मंत्रैश्च पितॄणां नोपतिष्ठत इति शंखवचनं रूप्यादीनां सर्वेषामभावेन त्वेकदेशाभावेपि सौवर्णेन पात्रेण ॥ राजतेनौदुम्बरेण वा खड्गपात्रेण वा ॥ शंकुनाप्युदकं पितृतीर्थस्य प्रान्दद्यादिति शंखोक्तं सति

संभवे। शंकुः कीलकः सच सुवर्णादिनिर्म्मितप्रकृतत्वात्॥ मध्यांगुलिद्वयः करः शं
कुरिति कश्चित्॥ यमः॥ त्रींस्त्रीन्जलाञ्जलीन्दद्यादुच्चैरुच्चतरं ततः॥ गोशृंग
मात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्॥ अस्यायमर्थः॥ पित्रादिषट्का ञ्जलित्रयेउ
त्तरोत्तरं वृद्धिः कर्त्तव्या॥ गोशृंगमात्रमिति तत्तीर्थाञ्जलेस्तु दैर्घ्यनिर्देशः॥ जलम
ध्य इति पक्षप्राप्त्यनुवादः॥ योगियाज्ञवल्क्यः॥ दक्षिणोपितृतीर्थेन जलं सिंचे
द्यथाविधि॥ दक्षिणो नैव वामहस्तो यात्पितृतीर्थं समीपतः॥ दक्षिणोकर इति
शेषः॥ मरीचिः॥ मुक्तहस्तेन दातव्यं मुद्रां तत्र न दर्शयेत्॥ मुद्रातर्ज्जन्यं
गुष्ठयोगेन पितृतीर्थावरोधतः॥ शंखलिखितौ॥ नैष्ठ काचते देवपितॄ
स्तर्प्पयेत्॥ उशनाः॥ न वेष्टितप्राणानेकषायवासा देवपितृकार्य्यं कु

रामः

५५

(117)

प्र्योत्॥ योगियाज्ञवल्क्यः॥ सवर्णोभ्यो जलं देयं नासवर्णेभ्यः कदाचन॥ मित्रत्वादि
प्रसक्तजलदाननिषेधोयं प्रकरणादिति॥ नैतद्बलात् भीष्मतर्प्पणनिषेधोपदि
तत्र प्रमाणमस्ति॥ पारस्करः॥ ब्राह्मणेन न कर्त्तव्यं शूद्रस्यह्योर्द्ध्वदैहिकं॥ शूद्रेण ब्रा
ह्मणस्यापि विनापारणवात्कचित्॥ अर्द्ध दैहिकमिति सामान्यनिर्द्देशात्॥ श्राद्धादि
परिग्रहोपि॥ परिणावी ब्राह्मणाच्छूद्रायामुत्पन्नस्तेन स्वपितुः कर्त्तव्यमित्यर्थः॥
कात्यायनः॥ ब्रह्माणं तर्प्पयेत्पूर्व्वं विष्णुं रुद्रं प्रजापतिं देवांश्छन्दांसि देवान् षीमु
राणाचार्य्यान्गंधर्वानितराचार्यान्सम्वत्सरं सावयवं देवीरप्सरसो देवानुरागान्ना
गान्सागरान्पर्व्वतान्सरितो मनुष्यान्यक्षान्रक्षांसि पिशाचान्सुपर्णान्भूतानि
पशून्वनस्पतीनोषधीर्भूतग्रामं चतुर्व्विधं तर्प्पतामित्योंकारपूर्व्वं तेनोनिवीतीम

मा २

श्रा० ५६

नुष्यान्॥सनकंचसनन्दनंतृतीयंचसनातनं॥कपिलंचासुरिंचैववोढुंपंचशिखं
स्तथा॥ततोपसव्यं॥तिलमिश्रंकव्यवाडनलंसोमंयममर्यमणं॥अग्निष्वात्तान्सो
मपांवर्हिषदश्चेति॥यमंचैके॥यमायधर्मराजायमृत्यवेचान्तकायच॥वैव
स्वतायकालायसर्वभूतक्षयायच॥औदुम्बरायदध्नायनीलायपरमेष्ठिने॥वृ
कोदरायचित्रायचित्रगुप्तायवैनमः॥इत्येकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्ज
लाञ्जलीन्यावज्जीवकृतंपापंतत्क्षणादेवनश्यति।जीवत्पितृकोप्येतानन्यां
श्चेतरउदीरतामंगिरसआयन्तुनऊर्जंपितृभ्योयेचेहमधुवाताइतित्र्यवंजनय
श्रसिंचेत्तृप्यध्वमितित्रिन्नेमोवःइत्युक्त्वामातामहाचार्यगुरुशिष्यर्त्विग्भ्यो॥
तिबांधवोअतर्प्पितादेहाद्रुधिरंपिबंति॥अन्यत्राप्युक्तं॥अतर्प्पिताःपितर

न्वारब्धे हस्ताभ्यां वा पिबन्ति वा॥ पाठक्रमादेव पूर्वत्वप्राप्तौ पूर्वमिति क्रमाभिधानात्॥ प्रत्येकं ब्र
ह्मादीनां तर्पणात्स्वं एवं तर्प्पयामिति॥ ॐकारपूर्वमिति च प्रत्येकमभिसम्बध्यते॥ तदुक्तं
योगियाज्ञवल्क्येन॥ अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु॥ तर्प्पयामिति सिक्त
व्यं नाम्ना च प्रणवादिना॥ अन्वारब्धेन पश्चाद्दक्षिणेन॥ एवं च देवतर्प्पणं॥ ॐ ब्रह्मा तृ
प्यताम् इत्यादिरूपं॥ बहुवचनान्तं भूतदेवादि सम्बन्धेन चार्थाद्बहुवचनं॥ पुराणा
र्णीतराशीति आचार्यविशेषणं॥ सावयवमिति सम्बत्सरविशेषणम्॥ चतुर्वि
धमिति भूतग्रामविशेषणाम्॥ साकांक्षत्वात्॥ ततो नीवीत्यभिधानात्॥ पूर्वमु
त्सर्ज्जनादिद्धमुपवीतीत्वमेव॥ तदुक्तं योगियाज्ञवल्क्येन॥ ब्रह्मादीनुपवीती तु देवती
र्थेन तर्प्पयेत्॥ नीवीती कायतीर्थेन मनुष्यान्सनकादिकान्॥ मनुष्यतर्प्पणमिति ॐ

सनकस्तृप्यतामित्याकारएकमेव॥तृप्यतामिति सेक्तव्यमित्यादिवाक्यस्यतदुत्तर
त्वात्॥ततो पसव्यमिति पितृतर्प्पणोपलक्षणं॥तेनातऊर्द्ध्वं दक्षिणामुखत्वमपि।
कव्यवाडादिभ्यपितृतर्प्पणेतुस्वधानमः इतिप्रयोज्यमनमस्कारस्वधान्वितानिति
योगियाज्ञवल्क्यवचनात्॥पितृतर्प्पणेस्वधानम इतिहारिहरमते॥कव्यवाडनल
इत्येकादेवतेतिकल्पतरुकारः॥तन्नुकव्यवाडादय इतिगोलाभिधानादयुक्तं॥अत
एवैकविवाडनलमितिकामधेन्वादौपाठः॥यमायैक इति मातान्तरत्वेनोपन्यस्तत्वे
नावश्यकत्वे॥अतएवैकैकस्येत्यादिनापापक्षयरूपफलाभिधानं॥नम इति
सर्वत्रचतुर्थ्यन्तसम्बधम्॥एतान्यमान्तेनतर्प्पणापर्य्यंतंजीवत्पितृकेनापिक
र्त्तव्यं॥अन्यांश्चेतरः॥इतरः प्रमीतपितृकः॥अन्यान्सपित्रादीनपितर्प्पयेदि

(12)

राम०

५०

त्यर्थः॥ जीवत्पितृकस्यापि पितामहादितर्प्पणं पितृपातित्यपक्षे येभ्योवापि पिता दद्यात्तेभ्योवापि पुत्रः प्रदद्यादिति याज्ञवल्क्यवचनात्॥ अत्र पित्रादितर्प्पणे अञ्जलित्रयं यमतर्प्पणप्रकृतत्वात्॥ एवं दिव्यपितृतर्प्पणेप्यञ्जलित्रयं तत्कर्म्मकत्वात्॥ एकैकस्येति तत्रापि सम्बंधात्॥ ब्रह्मादितर्प्पणे मनुष्यादितर्प्पणे वानुवृत्तौ प्रमाणाभावादेक एवाञ्जलिः॥ केचित्तु पुराणकल्पे त्रिरपः प्रीणनार्थाय देवानामपवर्ज्जयेदिति दर्शनाद्देवतर्प्पणेप्यञ्जलित्रयमित्याहुः॥ तदुक्तं॥ पितॄन् पितामहानिति प्रतिपुरुषमभ्यासादिति छन्दोगपरिशिष्टे षट्पुरुषमात्रे आवृत्तिदर्शनात्॥ एवं च स्त्रीतर्प्पणपक्षेप्येक एवाञ्जलिः त्रीं स्त्रीन् स्त्रीनिति पमोत्कृष्टषट्पुरुषमात्रगोचरमिति बोध्यं॥ तथा च॥ एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः अर्हन्ति पितरस्त्रीं स्त्रीन् स्त्रियोप्येकैकमञ्जलिम्॥ एवं चउद्दीरिता

ए

आ०
५८

मवइत्यादिमंत्रनवकस्यपित्रादित्रिकाञ्जलित्रिकेणैवसम्बधः॥जपन्मंत्रान्यथाक्रम
मितियोगियाज्ञवल्क्यवचनात्॥प्रत्येकमञ्जलीनांदेयत्वात्॥मंत्राणामपिप्रत्ये
कंप्रकाशनसामर्थ्यात्॥सर्वत्रतर्पणेन्वये॥आवृत्तिविकल्पोवास्यात्॥ए
कैकमंत्रपाठान्तरमेकैकाञ्जलिदानं॥मंत्रान्तकर्म्मादित्वान्निपातनिप
मात्॥अतएवजपन्नितिवर्त्तमानसामीप्यात्॥तनुमंत्रपाठकालएवजलोत्
सेकः॥गोत्राद्युच्चारणाभावप्रसंगात्॥नचमंत्रात्प्रागेववाक्यमित्यु
पियुक्तं॥त्यागार्थत्वात्॥परेत्वाहुः॥वाक्यमात्रेणतर्प्पणमादावुदीरिताभि
त्यादिमंत्रैस्तुसेकमात्रंपाठकालएवस्तोत्रमंत्रवदुच्चार्यमितितन्न॥
कर्म्मान्तकस्यनापत्तेः॥मंत्रैश्चदेवमुद्दकमितिविरोधाच्च॥तत्पश्चमि

तित्रिरितिपित्रादित्रयंमिलितमुद्दिश्यतत्पव्वमित्यनेनवारत्रयमुदकंदेयमित्यर्थः
नतुपाठमात्रमेवतत्॥ अद्दष्टार्पतापज्जैः॥ प्रसिंचेदिति सन्बपाच्च॥ मातामहादित्रिकेतुनमो
वइतितुस्त्वेत्यभिधानादेकवारमेवमंत्रमुच्चार्य्यतर्प्पणम्॥ प्रसिंचेदितिश्रवणाज्ज
लसेकमात्रमेवतर्प्पणम्॥ नतुपितॄननुद्दिश्यत्यागइतिमन्मोहेपः॥ नामगोत्रस्वरं
धाकारैस्तर्प्याःस्युरनुपूर्व्वशइतियोगियाज्ञवल्क्यत्यागस्यैवावगमात्॥ एवंचदे
वादितर्प्पणेपित्यागएवतुल्यतयानिर्द्दिष्टात्॥ कात्यायनानुक्तमपिदेवतर्प्पणम
नुष्यतर्प्पणयोर्मध्येमध्यन्तरोक्तंमरीच्यादितर्प्पणंपद्मपुराणहरिहरेणोक्तम्
कामधेनौतुयोगियाज्ञवल्क्यवचनमेवलिखितम्॥ तथाचमनुष्यतर्प्पणानन्तरं
तेषांस्त्रिपस्तर्प्याः॥ त्रीन्मातृतः पत्नपश्चपितृतर्प्पणामितिगोभिलदर्शनात्॥

124

सर्वमाप्नोतिपितृयज्ञक्रियाफलम्॥ पद्मपुराणे॥ ब्रह्माणंतर्प्पयेत्पूर्व्वंविष्णुंरुद्रं
प्रजापतिम्॥ देवायक्षास्तथानागागंधर्व्वाप्सरसोऽसुराः॥ क्रूराःसर्प्पाःसुपर्णाश्चत
रवोजंभकाःखगाः॥ विद्याधराजलधरास्तथैवाकाशगामिनः॥ निराधाराश्चयेजी
वाःपापधर्म्मरताश्चये॥ तेषामप्यायनायैतद्दीयतेसलिलंमया॥ कृतोपवीतीदे
वेभ्योनि वीतीतुभवेत्ततः॥ मनुष्यांस्तर्प्पयेद्भक्त्याऋषिपुत्रान्ऋषींस्तथा॥ सनक
श्चसनंदश्चतृतीयश्चसनातनः॥ कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा॥ सर्वे
तेतृप्तिमायान्तुमद्दत्तेनाम्बुनासदा॥ मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुं॥ प्रचे
तसंवसिष्ठंचभृगुंनारदमेवच॥ देवान्ब्रह्मऋषीन्सर्व्वांस्तर्प्पयेदक्षतोदकैः॥ अ
पसव्यंततःकृत्वासव्यंजानुंचभूतले॥ अग्निष्वात्तास्तथासौम्याहविष्मन्तस्त
थोष्मपाः॥ सुकालिनोबर्हिषदस्तथाचैवाज्यपाःपुनः तर्प्पयेत्पितृन्भक्त्या

125

सतिलोदकचंदनैः॥ दर्भपाणिस्तु विधिना प्रेतान्स्वांस्तर्प्पयेत्ततः॥ पित्रादीन्ना
मगोत्रेण तथा मातामहानपि॥ संतर्प्य भक्त्या विधिवदिमं श्लोकमुदीरयेत्॥
ये बांधवा अबांधवा ये ऽन्यजन्मनि बांधवाः॥ ते तृप्तिमखिलां यान्तु मद्दत्तेनाम्बु
नासदा॥ अत्र हरिहरः॥ देवादीनां देवास्तृप्यन्तामित्यादिवाक्येन तर्प्पणं॥ तेषा
माप्यापनोयेत ध्यानमात्रमित्याह॥ तदुक्तं॥ श्रुतं वाक्यं विहाय यद्वाक्यान्तर
कल्पनाया ध्यानकल्पनापाप्मयुक्तत्वात्॥ तस्माद्ब्राह्मणामित्यादौ पत्रवाक्यं
न श्रुतं तत्रैव योगियाज्ञवल्क्याद्युक्तवाक्यग्रहः॥ निवीती तु भवेत्तद्वति श्रवणा॥
दर्षिततर्प्पणे निवीतीत्वभ्रमो हेयः॥ निवीतस्य मनुष्यधर्म्मतया तत्र तत्राभिधा
नात्॥ केचित्॥ अथ निवीती ऋषींस्तर्प्पयामीति बोधायनदर्शनान्मरीच्यादि
तर्प्पणे निवीतित्वमाहुः॥ असत्तोदकैरित्यत्रासत पदं यव परम्॥ यवाद्भि

राम०
६०

(128)

स्तर्प्पयेद्देवानिति परिशिष्टदर्शनात्॥ अत्रब्रह्मादिचतुष्टयमोंकारादितृप्यतामि
त्यनेन॥ नाम्नादेवादीन्॥ देवायक्षा इत्यादिना॥ दीयते सलिलं मया॥ इत्यन्तेन उप
वीती॥ ततो निवीती सनकादीन् सनकश्चेत्यादिना सदेत्यन्तेन ततउपवीती मरीच्या
दीन् प्राचीन्॥ मरीचिस्तृप्यतामित्यादिना॥ एतान्सर्वान्यवमिश्रजलैस्ततः प्रा
चीनावीती अग्निष्वात्तादीन् सपत्नीकपितृगणान्॥ ॐ अग्निष्वात्तास्तृप्यता
मिदं सतिलचन्दनोदकं तेभ्यः स्वधा नम इति रूपतया॥ ॐ अमुकगोत्रः पिता
अमुकशर्म्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा इत्यादिवाक्यैः षट्पौरुषीरु
न्॥ ॐ अमुकगोत्रा माता अमुकदेवी तृप्यतामिदं जलं सतिलं तस्यै स्वधा इत्या
दिवाक्यैस्तेषां त्रिपत्नीस्तर्प्पयित्वा येवांधवा इत्यादिश्लोकेनावसानाञ्जलिं

१ घ्रादिति प्रयोगः॥ अथ कातीपत तर्प्पणप्रयोगः ॐ ब्रह्मास्तृप्यताम्॥ॐ विष्णुस्तृप्य
ताम्॥ॐ रुद्रस्तृप्यताम्॥ॐ प्रजापतिस्तृप्यताम् ॐ देवास्तृप्यन्ताम्॥ॐ छंदांसि
तृप्यन्ताम्॥ॐ वेदास्तृप्यन्ताम्॥ॐ ऋषयस्तृप्यन्ताम्॥ॐ पुराणाचार्यास्तृप्यंता
म्॥ॐ गंधर्वास्तृप्यन्ताम्॥ॐ इतराचार्यास्तृप्यन्ताम्॥ॐ सम्वत्सरः सावयवस्तृ
प्यताम्॥ॐ अप्सरसस्तृप्यन्ताम्॥ॐ देवानुगास्तृप्यन्ताम्॥ॐ नागास्तृप्यन्ताम्
ॐ सागरास्तृप्यन्ताम्॥ॐ पर्वतास्तृ न्ताम्॥ॐ सरितस्तृप्यंताम्॥ॐ मनुष्यास्तृ
प्यंताम्॥ ॐ यक्षास्तृप्यन्ताम्॥ॐ रक्षांसि तृप्यन्ताम्॥ॐ पिशाचास्तृप्यंता
म्॥ॐ सुपर्णास्तृप्यन्ताम्॥ॐ भूतानि तृप्यन्ताम्॥ॐ पशवस्तृप्यन्ताम्॥ॐ
वनस्पतयस्तृप्यन्ताम्॥ॐ ओषधयस्तृप्यन्ताम्॥ॐ भूतग्रामश्चतुर्विधस्तृ

१२१

प्यताम्॥ इत्युपवीती प्राङ्मुखो वा देवतीर्थवर्त्तिना पयोदकेनोदकेनैव वा तर्प्पयेत्
ततः ॐ मरीचिस्तृप्यताम्॥ ॐ अत्रिस्तृप्यताम्॥ ॐ अंगिरास्तृप्यताम्॥ ॐ पुलस्त्य
स्तृप्यताम्॥ ॐ क्रतुस्तृप्यताम्॥ ॐ प्रचेतास्तृप्यताम्॥ ॐ वसिष्ठस्तृप्यताम्॥ ॐ भृगु
स्तृप्यताम्॥ ॐ नारदस्तृप्यताम्॥ इति ऋषीन्देववत्॥ ततः ॐ सनकस्तृप्यताम्
ॐ सनंदस्तृप्यताम्॥ ॐ सनातनस्तृप्यताम्॥ ॐ कपिलस्तृप्यताम्॥ ॐ आसुरिस्तृ
प्यताम्॥ ॐ वोढुस्तृप्यताम्॥ ॐ पंचशिखस्तृप्यताम्॥ इति मनुष्यान्निवीती कायेन
तीर्थेनेति विशेषः॥ ततः ॐ कव्यवाडस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः॥ ॐ न
लस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः॥ ॐ सोमस्तृप्यतामिदं तिलोदकं तस्मै
स्वधा नमः॥ ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः॥ ॐ अर्य्यमास्तृप्यता
मिदं तिलोदकं तस्मै स्वधा नमः॥ ॐ अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः

रोनवागवास्त्रयार्वीणोभगवः सौम्यासः॥तेषांवयं सुमतौयज्ञियानामपिभद्रे सौमनसे
स्यामइतिमंत्रेणावाक्येनचद्वितीयं॥ॐ आयन्तुनः पितरः सोम्यासोऽग्निष्वात्ताः पथिभि
र्देवयानैः अस्मिन्यज्ञे स्वधयामदन्तोधिब्रुवन्तुतेवंत्वस्मानइतिमंत्रेणावाक्येनचतृती
यमञ्जलिंपित्रेदद्यात्॥ततऊर्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतंस्वधास्थ
तर्प्पयतमेपितॄन्॥अमुकगोत्रःपितामहोमुकशर्म्मातृप्यतामिदंजलंसतिलं
तस्मैस्वधाइतिप्रथमम्॥ॐपितृभ्यःस्वधापिभ्यःस्वधानमःपितामहेभ्यःस्वधापिभ्य
ःस्वधानमः प्रपितामहेभ्यःस्वधापिभ्यःस्वधानमः अंजनपितरोअमीमदन्तपितरोतृ।
प्यन्तपितरःशुंधध्वमितिमंत्रेणावाक्येनचद्वितीयं॥ॐयेचेहपितरोयेचनेहयांश्चवि
द्मयां॥उवनप्रतिविघ्नत्वंतेत्पयतितेयातवेदःस्वधाभिर्यज्ञं सुकृतंजुषस्वइतिमं
त्रेणावाक्येनचतृतीयमञ्जलिंपितामहायदद्यात्॥ततः॥मधुवाताऋतायते

मधुक्षरन्ति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥ ॐ अद्यामुक गोत्रः प्रपितामहोऽमुकशर्मा
तृप्यतामिदं जलं सतिलं तस्मै स्वधा प्रथमम् ॥ ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवं र
जः मधु द्यौरस्तु नः पिता इति मंत्रेण वाक्येन च द्वितीयमञ्जलिम् ॥ मधुमान्नो वनस्प
तिर्मधुमानस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः इति मंत्रेण वाक्येन च तृतीयमञ्ज
५ लिं प्रपितामहाय दद्यात् ॥ ततस्त्वं [illegible] प्य धं तप्य धूमिति मंत्रेण पित्रादिभ्योऽञ्जलित्रयं
दद्यात् ॥ ततः नमो वः पितरो शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधा
यै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहा
न्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासः इति मंत्रं पठित्वा ॥ ॐ अद्या
मुक गोत्रो मातामहोऽमुकशर्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा इति मातामह
हायाञ्जलित्रयं दद्यात् ॥ एवमेव प्रमातामह वृद्धप्रमातामहाभ्यामपि ॥ ततः ॐ अत्र
पितरो रसा नमो वः ५

(132)

राम०

६२

अमुकगोत्रामाताअमुकदेवीतृप्यतामिदंजलंतस्यैस्वधेतिमानरमे॥ एवमेव पितामही प्रपिता
महीमातामही प्रमातामहीवृद्धप्रमातामहीस्तर्प्पयेत्॥ ततआचार्य्यादीन्नामगोत्रस्व
धाकारैस्तर्प्पयेत्॥ अथविष्णुपुराणे॥ इदंचापिजपेदम्बुदद्द्यादात्मेच्छयानृप॥ उपकारायभू
तानांकृतदेवादितर्प्पणः॥ देवासुरास्तथायक्षानागागंधर्व्वराक्षसाः पिशाचागुह्य
काःसिद्धाःकुष्माण्डास्तरवःखगाः॥ जलेचराभूनिलयावाय्वाधाराश्चजन्तवः॥ प्री
तिमेतेप्रयान्त्वाशुमद्दत्तेनाम्बुनाखिलाः॥ नरकेषुसमस्तेषुयातनासुचयेस्थिताः॥
तेषामाप्यायनायैतद्दीयतेसलिलंमया॥ येबांधवाबांधवायेयेऽन्यजन्मनिबांधवाः
तेतृप्तिमखिलायान्तुयश्चास्मत्तोभिवांछति॥ इदंचकाम्यतर्प्पणमेभिरेवश्लोकै
र्द्देवविधिनाकर्त्तव्यम्॥ अथवशिष्ठः॥ स्नानशाटान्तुदातव्यामद्दत्तिस्तोविशुद्ध
ये॥ पराशरः॥ जलमध्येतुयःकश्चिद्द्विजातिर्ज्ञानदुर्बलः॥ निष्पीडयतितद्वस्त्रं

आ०
६४

स्नानं तस्य वृथा भवेत्॥ योगियाज्ञवल्क्यः॥ अन्तर्के प्रवत्तस्य अपसव्येन पीडनम्॥ पीडयित्वा ततः पश्चाज्जपं कुर्यात्सुविस्तरं॥ अन्नप्रकरवत्॥ आर्द्रे छिद्रसमीपान्न विकिरवत् तेन दक्षिणाग्रत्वेन स्थात्॥ असंस्कृतप्रमीतो हि श्यत्वंच॥ तथा चात्र गोभिलीयो मंत्रः॥ ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्॥ पीडयित्वेत्यादिना दर्शितो जपः छन्दोगविषयः कात्यायनादिभिरनभिधानात्॥ गोभिलसंवादाच्च॥ हारिहरस्तु वाजसनेयिनां जपानन्तरमेवेदमेतदनुष्ठानं नेव वाजपीयूपशोणितमित्यस्यापि जपस्याक्षिप्त इत्याह॥ अथ तर्पणोत्तरकर्म॥ तत्र विष्णुपुराणे॥ आचम्य च ततो दद्यात्सूर्याय सलिलाञ्जलिम्॥ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे॥ जगत्सवित्रे शुचये सवित्रे कर्मदायिने॥ कात्यायनः॥ निष्पीड्य वस्त्र

माचम्यब्राह्म्यवैष्णवरौद्रसावित्रमैत्रवारुणैः तान्त्रिंगैरर्च्चयेद्दद्यांहंसहसुप
स्थायप्रदक्षिणीकृत्य नमस्कृत्य दिग्वाम्बदेवताश्च ब्रह्माग्निपृथिव्योषधिवाग्वाच
स्पतिविष्णुमहद्भ्योऽद्भ्यो पांपतये वरुणाय नमः इति सर्वत्र ॥ सम्बद्धेसेति मुखं विमृज्य
देवागातुविद इति विसर्जयेदेष स्नानविधिः तान्त्रिकैर्ब्रह्मादिप्रकाशकैः अर्च्चयेदि
ति ब्रह्मादीनिति शेषः ॥ एषां च पूजा पुष्पैरेव ॥ तथा च पारिजात[illegible] ॥ ध्यात्वा प्र
णवपूर्वं तु दैवतं तु समाहितः ॥ नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक् पृथगिति ॥
कात्यायनेनाप्याशो सुमनसश्चाहत्येति सम्प्राञ्जलिदानार्थमेतत्पूजार्थं च पुष्पो
पादानमुक्तम् ॥ आवाहयामि मित्यादि विष्णुपूजाप्रकाशान्तेनं स्पोणिपाद्नव
क्रमते ॥ सावित्र्यैर्मन्त्रैर्वारुणैरिति सवित्रादि मन्त्रवकुवतान्मतस्व ॥ कात्या

(136)

स्ना०
६५

पनेनब्रह्मादीनांसमासेनाभिधानात्॥एकैकपरत्वेपिबहुत्वोपपत्तेः॥दिशा
श्चेतिचकारात्॥नमस्तुत्येतिपूर्वत्रापिसंबध्यते॥देवताःदिशामेव॥अत्रकेचि
दस्मृतदिगादिपदमनादृत्यप्राच्यादिपदेनइन्द्रमस्कारमिंद्रादिपदेनादिग्देवतान
मस्कारंकुर्वन्ति ब्रह्माग्नीत्यादौसमाननिर्दिष्टेपिपृथगेवनमस्कार्यत्वम्॥नमः
तिसर्वत्रैवोपसंहारात्॥महद्भ्य इतितुमिलितस्यैवनमस्कार्यत्वम्॥अत्रप्रतिपदयुपा
दानात्॥एषस्नानविधिरित्युपसंहारः॥तत्पर्यंतस्नानप्रयोगानुवृत्तेर्ज्ञापनार्थ
एतच्चप्रागेवप्रपंचितम्॥अत्रपूजादिप्रकारः॥ॐब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीम
तःस्वरूचोवेनआवः॥सबुध्न्या उपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ॐ
ब्रह्मणेनमः॥इदंविष्णुरित्यादिना॥ॐविष्णवेनमः॥ॐनमस्तेरुद्रमन्यवउतोत

ऋषवेनमः॥बाहुभ्यामुततेनमः ॐ रुद्रायनमः॥ॐ आकृष्णेनरजसावर्त्तमानोनिवे
शयन्नमृतंमर्त्यंच॥हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥ॐ सवि
त्रेनमः॥मित्रस्यचर्षणीधृतोवोदेवस्यसानसि॥द्युम्नंचित्रश्रवस्तमम्॥ॐ मित्रायनमः
इमंमेवरुण॥इत्यादिना॥ॐ वरुणायनमः॥इतिब्रह्मादीन्संपूज्योत्थाय॥अदृश्रम
स्यकेतवोविरश्मयोजनाम्॥अनुभ्राजन्तोअग्नयोयथा॥ॐ हंसःशुचिषद्वसुरन्तरी
क्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा
अद्रिजाःऋतंबृहत्॥इत्याभ्यांसूर्य्यमुपस्थायप्रदक्षिणीकृत्य॥ॐ आदित्यायन
मः॥ॐ दिग्भ्योनमः ॐ दिग्देवताभ्योनमः॥ॐ ब्रह्मणेनमः ॐ अग्नयेनमः ॐ पृ
थिव्यैनमः ॐ ओषधिभ्योनमः ॐ वाचेनमः ॐ वाचस्पतयेनमः ॐ विष्णवेनमः ॐ
महद्भ्योनमः ॐ अद्भ्योनमः ॐ अपांपतयेनमः।ॐ वरुणायनमः इतिनमस्कृत्य॥

श्रा॰
६६

सवर्चसापयसासतनूभिरगन्महिमनसासंशिवेन त्वष्टासुदत्रोविदधातुरायोनु
मार्ष्टुतन्वोयद्विलिष्टम्॥ इतिजपन्करद्वयेनमुखंसंस्पृशेत्॥ ॐ देवागातुविदोगातुंवि
त्वागातुमित॥ मनसस्पतइमंदेवयज्ञंस्वाहावातेधा॥ इतिविसर्जयेत्॥ अथयोगि
पात्रवत्क्रपः॥ प्रस्रावतीरेदेशेतुगत्वास्वधर्ममाचरेत्॥ गत्वागृहमितिशेषः॥ तथा
स्नवत्यादिस्थयाचम्यतोपानत्कोह्यसंस्पृशन्॥ आगतःसोऽपपात्रस्तुपतनेनशुचिरे
वसः॥ तेनोदकेनकृष्णाणिप्रोक्ष्याचम्यतथागृहे॥ ततःकर्माणिकुर्वीतनित्यवैया
त्रिकानिच॥ पात्राद्विरहितंतोयमुद्धृतंसव्यपाणिना॥ सतेनशौचंकुर्याद्वस्त्रनिः
पीडनेनच॥ सौवर्णराजतंताम्रंमृण्मयंपात्रंप्रकीर्तितम्॥ तदभावेस्मृतंपात्रंस्रव
तेयन्नधारितं॥ शातातपः॥ वहिर्नेपारिखवान्तःसोदकःकिंचिदस्पृशन्॥ रथ्या
गतोपियत्नेनशुचिरेवाहमानवः॥ तथा॥ नाधौतवस्त्रैकदेशेनशुद्धार्थमपत्राहरे

(139)

त्रायथानीतं तु सव्येन प्रोक्षयेद्दक्षिणेन तु ॥ पद्मपुराणे ॥ आचम्य विधिवत्सम्यगालि
खेत्पद्ममग्रतः अक्षताक्तैः सपुष्पाभिः सतिलारुणचंदनैः ॥ अर्घ्यं पात्रे प्रयत्नेन सू
र्य्यनामानुकीर्त्तनैः ॥ नमस्ते विष्णुरूपाय नमस्ते ब्रह्मरूपिणे ॥ सहस्ररश्मये नित्यं नम
स्ते सर्वतेजसे ॥ नमस्ते रुद्रवपुषे नमस्ते भक्तिवत्सल ॥ पद्मनाभ नमस्तेस्तु कुण्ड
लांगदभूषण ॥ नमस्ते सर्वलोकेश सुप्तानामपि बुध्यसे ॥ सुकृतं दुष्कृतं चैव स
र्वं पश्यसि सर्वदा ॥ सर्ववेद नमस्तेस्तु प्रसीद मम भास्कर दिवाकर नमस्तेस्तु प्रभाक
र नमोस्तु ते ॥ एवं सूर्य्यं नमस्कृत्य त्रिः कृत्वाच प्रदक्षिणां ॥ द्विजं गां कांचनं स्पृष्ट्वा त
तो विष्णुगृहं व्रजेत ॥ आश्रयस्थं ततः पूज्य प्रतिमां चापि पूजयेत् ॥ अस्तमंत्रतरणु
त्वाः ॥ सूर्य्यार्घान्तरे तथा विधानात ॥ अर्घ्यपात्रे दातव्य इति शेषः ॥ आश्रयपदस्थं जलं
स्य लग ॥ अथ देवपूजनं ॥ विष्णुपुराणे ॥ सूर्य्याय पाञ्जलिमुक्त्वा ततो गृहार्चनं कृत्वा ॥

आ० ८६

अभीष्टसुरपूजनं॥ जलाभिषेकपुष्पाद्यां धूपादीनां निवेदनैः॥ आदिपदेन गंधदी
पनैवेद्यग्रहणम्॥ पद्म॥ देवमाल्यापनयनं देवागारसमूहनम्॥ स्नापनं सर्वदेवा
नां गोप्रदानफलं स्मृतम्॥ ब्रह्मपुराणे॥ देवानां प्रतिमापत्र बद्धा ताभ्यंगस्नाभवेत्
फलानि तस्य देहानि अध्यायापंचविंशतिः॥ अष्टोत्तरशतं स्नाने पलंदेयं चत बीहा॥
द्वेसहस्रपलानां च महास्नाने च संख्यया॥ दातव्यं येन सर्वासु दिक्षु निर्यातितद्धृतं
बलिं गलग्नं विप्रेभ्यो वैश्यं च प्रदीयते॥ रुद्राग्रलग्नमन्नो चरहेत्सर्वं चत त्सरा॥
त॥ शिष्टेभ्यस्त्वन्यदेवेभ्यो पत्तद्दीनेषु निःक्षिपेत्॥ विप्रेभ्यस्त्वथ तद्देयं ब्रह्मरोपानि
वेदितं॥ वैष्णवं सात्वतेभ्यश्च भस्मांगेभ्यश्च शांभवम्॥ सौरं गमेभ्यः शाकेभ्यस्तायिने
पन्निवेदितम्॥ स्त्रीभ्यश्च देयं मातृभ्यो यत्तु किंचिन्निवेदितं॥ भूतप्रेतपिशाचेभ्यो पत्तु
दीनेषु निःक्षिपेत्॥ प्रतिमेत्युपलक्षणम्॥ तेन लिंगे पीयमेवाभ्यंगादिद्रव्यसं

पूजायामितिस्थानामितिस्थानान्तरोक्तं॥ देवीपुराणे॥ शुचिवस्त्रधरः प्राज्ञो मौनी
ध्यानपरायणः॥ गतकामभयद्वेषो मममात्सर्यवर्जितः॥ आत्मानं पूजयित्वा
तु स्वगंधासितवाससा॥ सुमुहूर्ते यजेद्देवान्स्वकीयासनसंस्थिताम्॥ आहूय वा
र्घपाद्यादिके ममात्रेणासापयेत्॥ रक्तबिल्वोत्पलैः॥ पुष्पैर्दधिदूर्वाकुशैस्तिलैः॥
सामान्यः सर्वदेवानामर्घोयं परिकीर्तितः॥ अभावाद्दधिदूर्वादेरर्घ्यानं सर्वकर्म
चेत्॥ सुमुहूर्त इति विहितपूर्वाह्णादिकालनपरम्॥ रक्तं कुंकुममिति कस्यचिद्रक्त
अस्तता आमनरादुत्वाः॥ सूर्यविष्णुशिवदुर्गाणां सामान्यतः॥ पञ्चोपचाराः॥
चंदनागरुकर्पूरकुंकुमान्यनुलेपने॥ पुष्पाणि गिरिवनसुवाटिकासंभवानि वि
कसितानि केशकीटरहितानि॥ अपर्युषितानि॥ स्वयमपतितानि॥ अखंडिता
नि आघ्रातानि प्रोक्षितानि पत्राण्यपीदृशानि॥ निर्गंधान्यपीति विशेषः॥ धूपे गुग्गु

१५

राम

१६

ख्यायद्यपिच्चतंप्रकृतंतथापिदुर्गभास्करिक्तानेपीयमेवसंख्या॥ एतच्चभविष्य
पुराणउक्तम्॥ ब्रह्मणा लग्नमित्यादिनास्नानचत्वादिप्रतिपत्तिः॥ विप्रेभ्यस्त्व
यदित्यादिनादत्तनैवेद्यादिप्रतिपत्तिः सात्वततंत्रात्यादि दैवपुष्पादित्यधिकृत्य
पंचमः सात्वतो नामविष्णोरायतनान्यपि पूजयेत्तथा राज्ञो परिस्पात्संपते
द्रियः॥ इतिपुरा॰ विष्णुपुराणोदर्शितः॥ तान्यपिनैवुद्धाय॥ एतच्चतुतिष्विकृत्या
द्रोपत्रवुद्धपूजाविहितातत्परम्॥ मात्स्य इतिदेवीमात्रोपलक्षणाम्॥ पूजा
धारमाह॥ शातातपः॥ भूमावप्सुतथाग्नौ च हृदि विसूर्येचदेवताः॥ तथा॥ स्त्रं
सुदेवामनुष्याणां दिविदेवामणीषिणाम्॥ काष्ठलोष्ठेषुमूर्खाणांयुक्त
स्यात्मनिदेवताः॥ व्योमसूर्यपूजायाम्॥ लिंगशिवपूजायाम्॥ प्रतिसर्वे

माा

न्तुः संवृतः ॥ केवलो वान्न साग्रुरुद्द्व ॥ दीपेद्ध तैलं वा नैवेद्यो भक्ष्यभोज्यकं दलमूल
फलान्नपानकादीनि पक्वं पक्वमकुषितं ॥ तन्मध्यविरुद्धम् ॥ पक्वान्नं वैश्वदेवान्नं वै
श्वदेवान्नमप्यमुद्धृत्य दातव्यम् ॥ प्रतिदेवं स्नानादि विशेषाः पंचोपचार विशेषा
श्च जप स्तुति प्रदक्षिण प्रणाम विसर्जन विशेषाश्च विस्तरतया न लिखिताः ॥ स्न
नीं निषेधाः तत्र नरसिंहपुराणे ॥ सान्तनुं प्रति नारद वाक्यम् ॥ अतः प्रभृति निर्म्मा
ल्यं मा लंघय महीपते ॥ नरसिंहस्य देवस्य तथान्येषां दिवौकसाम् ॥ भविष्यपुरा
णे ॥ यथा न लंघयेत्कश्चित्स्नपनं भास्करस्य तु । तथा कार्य्य प्रयत्नेन लंघितं
हरत्प्रभावहम् ॥ तामिस्रं नरकं कर्ता लंघयेद्यः स रौरवम् ॥ देवीपुराणे ॥ वस्त्रं गुलि
विहीनं तन्नपात्रं कारयेत्क्वचित् ॥ न कश्चिदतिस्नानादीनि द्वेषः ॥ बौधायनः
परीहितमधिरूढमप्रक्षालितं प्रावरणं मलतुलितं मनुष्य संगतं तद्देवतापेन संयु

श्रा०
६९

ज्यात्॥ तथाह हारीतः॥ स्नानं कृत्वा तु ये केचित्पुष्पं गृह्णन्ति मानवाः॥ देवतास्तन्न
गृह्णन्ति भस्मी भवति काष्ठवत्॥ देवीपुरा पुराणे॥ शिवे विवर्जयेत्कुन्दमुन्म
त्तं चैव हरेस्तथा॥ देवीनाम र्कमंदारौ सूर्य्यस्य तगरं तथा॥ दुर्ज्ञा या मर्कमंदारयोर्वि
हितत्वाद्देवीपरं तदितरपरम्॥ सूर्य्यस्यात्र तगरनिषेधात्॥ कुन्दोत्तगरश्चेति
भविष्यपुराणीयो विधिः केवलविहिताभावे एवमन्यत्रापि केवलविहिताभा
वे विहितानिषिद्धोपादानम्॥ भविष्यपुराणे॥ कृष्णसोन्मत्तकं कांचीतयाच गिरि
कर्णिका॥ न कण्टकारिकापुष्पं तथान्यद्गंधवर्जितं॥ न चाम्रातकजैः पुष्पै
र्धूनीयो दिवाकरः॥ कृष्णलाकरंजनी इति प्रसिद्धा॥ कांचीवराही॥ गिरिक
र्णिका॥ अपराजिता॥ कण्टकारिका विहितापि विष्णुपूजायाम्॥ वामनपुराणे
सुरभीनि तथान्यानि वर्ज्जयित्वा तु केतकीम्॥ केतक्यशोकचम्पकेति

क॰

१५९

नरसिंहपुराणीयो विधिः॥ काम्यपूजायां नरसिंहभक्तौ वा॥ शिवपूजायां भविष्यपु
राणे॥ केतकी चातिमुक्तश्च कुन्दो यूथी मदन्तिका॥ सिरीषसर्ज्जं बंधूककुसुमानि
विवर्ज्जयेत्॥ अंकोलपत्रकुसुमं करंजेद्रुतरूद्भवम्॥ विभीतकानि धन्वानि कुसुमा
नि विवर्ज्जयेत्॥ निर्गंधीन्युग्रगंधीनि कुसुमानि विवर्ज्जयेत्॥ गंधहीनमपि ग्राह्यं
पवित्रं यत्कुशादिकं॥ अतिमुक्तौ धवी त्वता॥ मदंतिकापुष्पमनुकारि पुष्पं॥ इंद्रतो
ःसिन्धुवारः॥ तथा॥ नसश्चकीजं न्नास्तोऽङ्कनकुशुल्कागुरुसंभवं॥ दद्याद्धर्म्माय
धर्म्मात्मा धूपमाराधनो यतः॥ अश्लोऽङ्गिरिजपीलुप्रभवं॥ तथा सर्ज्जदीपाधिका
रे॥ तांश्च दत्वा न हिंसेत न च तैलं विवर्ज्जितान्॥ कुर्वीत दीपहर्त्ता च मूषको न्धश्च
जायते। विष्णुः॥ नतन्नं ग्रहीतेनोदकेन देवके मर्त्यं कुर्य्यात्॥ चन्दनं कुंकुमागुरु
कर्पूरमृगमदजातीफलवर्ज्जमनुलेपनं नदद्यात्॥ नवासो नीलरक्तं॥ नम।

णि सुवर्णायोः प्रतिरूपमलंकारणं ॥ नोग्रगंधिपुष्पं नागंधि नकंटकिजं ॥ कंटकिज

मपि सुगंधि शुक्लं पत्रं देयात् ॥ न रक्तं देयात् । रक्तमपि कुंकुमं जलजं च देयात् ॥ न

धूपार्थं जीवजातं ॥ न घृततैलं विना किंचिन्न दीपार्थे । नाभक्ष्यं नैवेद्यार्थे । भक्ष्येष्व

प्यजामहिषीक्षीरे पंचनखमत्स्यवाराहमांसानि ॥ प्रयतः शुचिर्भूत्वा सर्वमेव

निवेदयेत् ॥ तन्मनाः सुमना भूत्वा त्वराक्रोधविवर्जितः ॥ कुंकुमं जलजं वेति वि

हितरक्तपुष्पोपलक्षणं ॥ तेनत्रोष्यन्तरविहितान्यपि शमीकुशपत्राणि शोक

करवीरपाटलापारिभद्रपुष्पाणि देयानि ॥ एते च निषेधा विष्णुपूजामुपक्रम्य

विष्णूक्ता इति तत्रैव निबंधकृद्भिर्लिखिताः ॥ तत्राहुः ॥ देवकर्मेति सामान्य

वचनात् सर्वविषयत्वं देवपदं न च विष्णुपरम् ॥ संकोचापत्तेः ॥ प्रकरणादेव वि

ष्णुप्राप्तौ विपर्यासापत्तेश्च ॥ तस्मात् सूर्याद्यध्याये नैव विष्णुपूजाकथनम् ॥ नक्तमवि

196

राम॰

७०

णोः सुवर्णयोः प्रतिरूपमलंकरणं॥ नोग्रगंधिपुष्पं नागंधि न कंटकिजं॥ कंटकिज
मपि सुगंधि शुक्लं यत्नेन दद्यात्॥ न रक्तं दद्यात्। रक्तमपि कुंकुमं जलजं च दद्यात्॥ न
धूपार्थे जीवजातं॥ न घृततैलं विना किंचि न दीपार्थे॥ नाभक्ष्यं नैवेद्यार्थे॥ भक्ष्येष्व
प्यजामहिषीक्षीरे पंचनखमत्स्यवराहमांसानि॥ प्रयतः शुचिर्भूत्वा सर्वमेव
निवेदयेत्॥ तन्मनाः सुमना भूत्वा त्वराक्रोधविवर्जितः॥ कुंकुमं जलजं चेति वि
हितरक्तपुष्पोपलक्षणं॥ तेन ग्रंथान्तरविहितान्यपि शमीकुशपत्राशोक
करवीरपाटलापारिभद्रपुष्पाणि देयानि॥ एते च निषेधा विष्णुपूजामुपक्रम्य
विष्णूक्ता इति तत्रैव निर्बंधकृद्भिर्लिखिताः॥ तत्राहुः॥ देवकर्मेति सामान्य
वचनात्सर्वविषयत्वं देवपदं न च विष्णुपरम्॥ संकोचापत्तेः॥ प्रकरणादेव वि
ष्णुप्राप्तौ वैयर्थ्यापत्तेश्च॥ तस्मात्पूर्वाध्यायेनैव विष्णुपूजाकथनम्॥ न रक्तमि

(१४७)

राम०

७०

१४८

साघध्यायान्तरं सामान्यविषयमिति॥ कालिकापुराणे॥ शिवं भास्करमग्निं च के
शवं कौशिकीमपि॥ मनसा प्रनर्च्चयन्याति देवलोकादृध्वो गतिम्॥ कौशिकी
दुर्गा॥ अथ भविष्यपुराणे॥ सदा पठन्ति पत्तेन सदा दानं ददन्ति च॥ सदा च वापु
भक्तास्ते नित्यं ये ऽर्च्चयन्ति भास्करं॥ नरसिंहपुराणे॥ यश्च पूजयते नित्यं नरसिंह
नरेश्वरं॥ स स्वर्गे मोक्षभागी स्यान्नात्र कार्य्या विचारणा॥ भविष्यपुराणे॥ न हि लिं
गार्च्चनात् किंचित् सुराणमभ्यधिकं क्वचित्॥ इति विज्ञाय यत्नेन पूजनीयः सदाशि
वः॥ तथा॥ दुर्गार्च्चनरतो नित्यं महापातकसंभवैः॥ दोषैर्न्न लिप्यते वीरपद्म
पत्रमिवांभसा॥ अत्र च क्रमाभिधानेपि सूर्य्यपूजा प्राथम्यमाचरेत्॥ सूर्य्यादि
प्राथम्यं तु विष्णुपुराणपद्मपुराणयोर्व्यक्तमेव॥ नारसिंहपुराणेपि वृलयत्ना

न्तैनैरमुक्तं॥ततोर्द्धभानवेदपात्तिलपुष्पजलान्वितं॥उत्थाप्यमूर्द्धपर्य्यन्तं
हंसःशुचिषदित्यपि॥जलंदेवंनमस्कृत्यततोगृहगतोपुमान्॥विधिना
पुरुषसूक्तस्यतत्राविष्णुंसमर्चयेत्॥वैश्वदेवंततःकुर्य्याद्वलिकर्म्मच
पाविधि॥अथवैश्वदेववलिकर्म्मणि॥तत्रवाजसनेयगृह्ये॥वैश्वदेवा
दन्नात्पर्य्युक्ष्यस्वाहाकारैर्जुहुयाद्ब्रह्मणेप्रजापतयेगृह्याभ्यःकश्यपा
यानुमतयइतिभूतगृह्येभ्यःमणिकेत्रीन्पर्य्यन्यायापाभ्यःपृथिव्यैधा
त्रेविधात्रेचद्वार्य्ययोःप्रतिदिशंवायवेदिशांचमध्येत्रीन्ब्रह्मणेन्तरीक्षा
यसूर्यायविश्वेभ्योभूतेभ्यस्तेषामुत्तरउषसेभूतानांचपतयेपरंपितृ
भ्यःस्वधानमःइतिदक्षिणातःपात्रंनिर्णिज्योत्तरापरस्यांदिशिनिनये

यस्मैतन्नशतिं॥ वैश्वदेवादित्तन्नव्यपदेशः॥ विश्वेदेवताकवलिसम्बन्धात्॥ य
द्यपि देवतान्तरमपि वस्पतितथाप्येकदेशो न व्यवहारः अत एव होमेप्यस्मिन्वै
श्वदेवगतं गौतमादिकल्मे होमेपि विश्वेदेवसम्बन्धात्। अन्नाङ्गृहीत्वेति शेषः।
पर्य्युक्ष्याग्निमिति शेषः॥ चित्रादि समाचारात्॥ एवंच पर्य्युक्षणस्य स्वाहाकारस्य च
होमसामान्यधर्म्मत्तयोरुक्तस्यापि पुनरुपादानम्॥ एष एवविधिर्य्यत्र क्वचिद्धोम
इत्यत्र ग्रंथेन सामान्यधर्म्माभिधानात्॥ ब्रह्मणे इत्यादिना प्रत्येकं होमदेवतानि
र्दिष्टाः अनुमतय इति कारो होमसमाप्त्यर्थः॥ त्रीन्वलीनिति शेषः। भूतगृह्याविव
रणं पर्य्यन्त्यापाश्चः पृथिव्यै इति तेन पर्य्यन्यादिपदेनैव प्रत्येकवलिदानमिति
सिध्यति॥ द्वार्य्ययोः द्वारवामदक्षिणप्रदेशयोः प्रतिदिशं गृहस्य पूर्वदक्षि
णपश्चिमोत्तरासु दिक्षु दिशां आसामेव चकारात्प्रतिदिनमिति संबध्यते॥ म

छंदोगगृह्यस्यैव ब्रह्मणो गृह्यादित्रयं॥ त्रीनित्यत्र देवताविधायकं तेषां ब्रह्मादिद्वितीया
मुत्तरतः॥ उत्तरस्यां दिशि॥ अपरं श्रुतिमतेन विश्वेदेवादिद्वयम् उत्तरस्यां दिशि उ
त्तरोत्तरं स्यात्तस्मा इतितिष्ठति॥ उत्तरापरावायवीदिक्॥ अत्र वदन्ति॥ अयं विधिः सा
ग्नेरेव अग्न्याहितेर्जातमनोक्तो होमः साकल्येन च॥ अनाहिताग्नेरप्येष पुंस्पतेव
लिभिः सह॥ इति वाक्येन निरग्नेः प्रकारान्तरविधानात्॥ न च छंदोगपरिशिष्ट
श्रवणात्॥ छन्दोगविषयं प्रकारान्तरम्॥ सर्वशाखाप्रत्ययमेकं कर्मेति न्याये
न सर्वगोचरत्वात्॥ किंच॥ यदीदं छन्दोगविषयं तदा निरग्निवाजसनेयिनां वै
श्वदेवानस्यादेव प्रापकाभावात्॥ निरग्नेश्च मार्गाकाभावात्॥ साग्निविषय
तयैवेति तस्युक्ते वैश्वदेवं तु कुर्वीत स्वशाखाविहितं नर इति व्यासवाक्यात्
पारशाखिक वैश्वदेवानुष्ठानायोगात्॥ यद्यपि सर्वशाखाप्रत्ययमेकं क

किंच।

र्म्मतथापिस्वशाखाविहितंकर्म्मविहायनान्यशाखीयानुष्ठानंयत्तुकर्म्मस्वशाखायां
नविहितंस्वशाखाविहितात्वविरुद्धंचतत्परशाखिकमप्यनुष्ठेयम्॥तदुक्तंछंदोगपरि
शिष्टे।स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंचयः॥कर्त्तुमिच्छतिदुर्म्मेधामोघंतत्
तस्ययत्कृतम्॥यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्॥विद्वद्भिस्तदनु
ष्ठेयमग्निहोत्रादिकर्म्मवदिति॥शाखोक्तोयंविशेषः॥इदंतुगृह्योक्तमितिचेत्
नस्वशाखाश्रयमितिस्वशाखानुगतत्वमात्रस्यविवक्षितत्वात्॥वह्वृचस्यवा
स्वगृह्योक्तंयस्यकर्म्मप्रकीर्त्तितम्॥तस्यतावतिशास्त्रार्थेकृतेसर्व्वेतेसर्व्वैःकृतो
भवेत्॰इतिगृह्यपरिशिष्टेनतत्रापिविशेषविधानाच्च॥तस्मान्निरग्निर्वा
जसनेयिनामपिस्वगृह्योक्तएवकल्पइति।मासिकस्यचतुरुदपात्रविशेष
स्यलौकिकत्वात्नग्निनाप्युपासनमस्तु॰अनग्निपक्षेवाउदकुंभस्यवास्तु॥

आ॰
७२

अप्युदकं भवतीति गौतमाभिधानात्॥ उदपात्रमात्रोपलक्षणं वा मणिकपरं
उदपात्रसन्निधावित्यापस्तम्बवचनात्॥ न च प्रापकाभावः। सामान्यविधेरेव प्रा
पकत्वात्॥ तथा चाहाशनान्तरं संवर्त्तः॥ ततः पंचमहायज्ञान्कुर्यादहरहर्द्विजः।
न ह्यपयेत्तु तान्सक्तः आपन्नोपि सुतावपि। तत्र च श्रुतिः॥ पंचैव महायज्ञास्ता
न्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति॥
अहरहर्भूतेभ्यो बलिं हरेत्तथैतं भूतयज्ञं समाप्नोति। अहरहर्दद्यादोदपात्रात्त
थैतं मनुष्ययज्ञं समाप्नोति॥ अहरहः स्वधा कुर्यादोदपात्रात्तथैतं पितृयज्ञं
समाप्नोति। अहरहः स्वाहा कुर्यादाकाष्ठात्तथैतं देवयज्ञं समाप्नोति॥ अथ ब्रह्मय
ज्ञः॥ स्वाध्यायो ब्रह्मयज्ञस्तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्च
क्षुः ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनं यावन्तं ह वा इमां पृथि

वीं वित्तेन पूर्णां ददल्लोकं जयति तिस्तावत्तं जयति भूयांसं चाक्षयं य एवं विद्वान् अह
रहः स्वाध्यायमधीयात् तस्मात्स्वाध्यायोऽध्येतव्यः ॥ मनुः ॥ पंचसूना गृहस्थस्य चु
ल्ली पेषण्युपस्करः ॥ कण्डनी चोदकुंभश्च वध्यते यास्तु वाहयन् ॥ तासां क्रमेण सर्
वेषां निष्कृत्यर्थं महर्षिभिः ॥ पंच क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥ अध्याप
नं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं ॥ होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं ॥ सूना प्रा
णिवधस्थानं उपस्करः संमार्जनी ॥ गृहोपकरणं भाण्डादीत्येके । वध्यते हन्तीत्यर्थे
आर्षत्वात् ॥ अथवा वध्यते हिंसाजन्यदुरिते न संबध्यते । हन्यते वेत्यर्थः । वाहय
न् प्रवर्तयन् । तासामित्यादिना एतत्पापक्षयार्थं पंचमहायज्ञा इत्युक्तं ॥ एतच्चानु
वादमात्रं श्रुतावहरहरित्युक्ते र्जीवनवदधिकारावगमात् ॥ अत्रापि प्रत्यहमि

तिश्रवणात्॥ अथवानुवादात्सूनाजनितपापक्षयोपि। एवं स्वर्गापवर्गयोः सिद्धि
पाकयज्ञैः प्रचरन्त इति व्यासादपिफलान्तरमिति॥ प्रत्येकमपि फलमस्ति। तथाहा
रीतः॥ यद्देवेभ्यो जुहोति देवलोकं तेनाभिजयति॥ यत्पितृभ्यः पितृलोकं तेन यत्स्वा
ध्यायमधीते ऋषिलोकं तेन॥ यद्भूतेभ्यो बलिं हरति भूतलोकं तेन॥ मनुः॥ धन्यं
यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं॥ पितृयज्ञप्रकारान्तरं छंदोगपरिशिष्टे॥ श्राद्धं
वा पितृयज्ञः स्यात्पितृभ्यो बलिरेव वा॥ पंचयज्ञप्रकारान्तरमाहुर्मनुविष्णुयमसं
वर्ताः॥ देवतातिथिभृत्यानां पितॄणामात्मनश्च यः॥ न निर्वपति पंचानामुच्छ्व
सन्न स जीवति॥ तदेषां वाक्यानां सामान्यविषयत्वात्॥ वैदिके आवसथ्याग्नौ
कुतोत्सचे॥ अन्येन होमं कृत्वा त्यक्ते। अंगिराः॥ शालाग्नौ वा पचेदन्नं लौकि

155

राम०
७४

केवाऽग्निनित्यशः यस्मिन्नग्नौ चैपचेदन्नं तस्मिन्होमो विधीयते ॥ अस्यार्थः ॥ साग्नि
नापाकोहोमश्चौपासनाग्नावेव कर्त्तव्यः ॥ निरग्निनातु लौकिक इति ॥ छन्दोग
परिशिष्टे ॥ पाणापाहुतिर्द्वादशापर्वपूरिकाऽस्सादिना वैस्रुवमान्नपूरिकैर्वैवेन
तीर्थेन च हूयते हविः स्वंगारिणा स्वर्द्विषिन्नपावके ॥ तथा ॥ हविष्येषु यवा मुख्या
स्तदनुव्रीहयः स्मृताः माषकोद्रवगौरादीन्सर्वालाभेपिवर्जयेत् ॥ गौरः सित
सर्षपः आदिपदेन चणकमाषमसूरकुलत्थोद्दालकवर्जमिति शंखलिखि
तोक्तपरिग्रहः ॥ आपस्तम्बः ॥ नक्षारलवणांहोमे विधते ॥ तथा ॥ अपरान्नसंसृ
ष्टस्य हविष्यस्य होमः ॥ तथा ॥ न स्त्री जुहुयान्नानुपेतः । अनुपेतः । अनुपनी
तः । एतच्च साग्नेः प्रवासे अग्नि सन्निधाने सति । अन्यत्र प्रशान्त्यभावात्
निरग्नेस्तु स्वकर्त्तृक एव वैश्वदेवः । तथा ॥ आर्य्याः प्रयता वैश्वदेवान्नसंस्कर्त्ता

रःस्नुः भार्या कांक्षन्वस्तुमित्यभिमुखोन्नं वर्ज्जयेत्॥ केशानां गवासम्बालभ्याय उ
पस्पृशेत्॥ स्मार्त्योऽत्र चन्द्रिकाः॥ बौधायनः॥ भोजनं हवनं दानमुपहारः प्रतिग्र
हः॥ वहिर्जानुर्न कार्य्याणि तद्वदाचमनं स्मृतं॥ छंदोपरिशिष्टे॥ जुहुयुष्व जुहूते
चपाणिना तथ्यार्थस्वहारू भिः॥ न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना॥ मुखे
नैके धमन्त्यग्निं मुखाद्देषोऽत्यजायत॥ न मुखेनेति पक्षोक्तं लौकिके योजयेति
तत्॥ वामनपुराणे॥ दानं प्रतिग्रहो होमो भोजनं बलिरेव च॥ सांगुष्ठेन सदा
कार्य्यमासुरो ह्यन्यथा भवेत्॥ याज्ञवल्क्यः॥ देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं
हरेत्॥ अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निःक्षिपेत्॥ श्वादिबलीनां पृथग्वै
शात्॥ भूतयज्ञवहिर्भावः॥ ब्रह्मादितीर्थाधिकारे हारीतः॥ मार्ज्जनाचमनबलिक
र्म्मभोजनानि दैवेन॥ कंदेगापरिशिष्टे॥ नाधरार्द्धवलयो भवन्ति महामार्ज्जा

(157)

राम
७५

स१

रश्रवरा प्रमाणात्॥ एकत्रैव च विप्रकृष्टा भवंतीतरेतरासंसक्ताश्च॥ अवरार्ध्यान्पू
नाः॥ एकत्र चेदित्यादिना नानास्थाने बलिदानासंभवे एकस्मिन्नेव पदा बलयो
दीयन्ते तदा अविप्रकृष्टा अव्यवहिता इतरेतरासंसक्ताश्च परस्परासंलग्नाश्च
दातव्या इत्यर्थः॥ अस्मिन्नपि पक्षे धात्रादिबलिषु द्वारादिकल्पनीयम्॥ आपस्त
बः॥ बलीनां तस्य तस्य देशस्य संस्कारो हस्तेन परिमृज्याबोक्ष्यन्युपलिप्य पश्चात्प
रिषेचनं॥ तस्य तस्येत्यावृत्तेः प्रत्येकं परिमार्जनादि। अवोक्ष्यासिक्त्वानुपलिप्य
बलिं दत्त्वा परिषेचनं बलेरूपरिसेकः। बलीनुक्त्वा छंदोगपरिशिष्टे॥ पित्र्यवच्च प
श्चिमा प्रतिपत्तिः॥ पित्र्यवद्गन्धादिप्रक्षेपेण पश्चिमा अन्तिमा। यत्तु पश्चिमा
प्रतिपत्तिः पितृबलिप्रतिपत्तिरिति व्याख्यानं तदयुक्तम्॥ सर्वबलिषु प्र

हरेत्॥ ३२ पत्नीकर्त्तृकबलिहरणे यजमानाद्यनुपस्थितौ॥ अत्र च भ्रात्रादी-
नामविभक्तानां विभक्तानामपि संसृष्टानां मुख्येनैकेनैव वैश्वदेवादिपाक-
यज्ञाः कर्त्तव्याः यदाह॥ एकपाके नवसतां पितृदेवद्विजार्च्चनम्॥ एकं भवेद्वि-
भक्तानां तद्देवस्याद्गृहे गृहे॥ एकपाके नवसतामित्युपक्रम्य संसृष्टानामप्यभिधा-
नात्॥ विभक्तानामिति द्रव्यपार्थक्यपरम्॥ देवार्च्चनमत्र वैश्वदेवः॥ अत्र च हो-
मात्प्राक् गंधादिना वन्हिपूजनं कर्त्तव्यम्॥ तदुक्तं मार्कंडेयपुराणे॥ संपूज्य यत्न-
तो वन्हिं दद्याद्वै वाहुतीः क्रमादिति॥ अथ प्रयोगः॥ पर्युक्षिते समिद्धेऽग्नौ त-
दभावे जले तदभावे भूमौ पाकादन्नमुद्धृत्य फलमूलादिना वा पंचाहुतीर्जु-
हुयात्॥ ॐ ब्रह्मणे स्वाहा॥ ॐ प्रजापतये स्वाहा ॐ गृह्याभ्यः स्वाहा ॐ कश्यपा-

159

यस्वाहा ॐ अनुमतयेस्वाहा॥ ततोहुतशेषान्नेवबलिदानम् ॐ पर्ज्यन्यायन
मः ॐ अद्भ्योनमः ॐ पृथिव्यैनमः इत्युदपात्रसन्निधौ ॐ धात्रेनमः ॐ विधा
त्रेनमः इतिद्वार्यपो ॐ वायवेनमः इतिप्रतिदिशम्॥ ॐ प्राच्यैनमः ॐ अपा
च्यैनमः ॐ प्रतीच्यैनमः ॐ उदीच्यैनमः इत्यादि प्रतिदिशं॥ ॐ ब्रह्मणेनमः ॐ
अंतरीक्षायनमः ॐ सूर्य्यायनमः॥ इतिगृहमध्ये॥ ॐ विश्वेभ्योदेवेभ्योनमः॥
ॐ विश्वेभ्योभूतेभ्योनमः ॐ उषसेनमः॥ ॐ भूतानांपतयेनमः॥ इत्युत्तरो
त्तरं॥ ततः प्राचीनावीतीदक्षिणाभिमुखः पातितवामजानुः पितृतीर्थेनद
क्षिणस्यांदिशि ॐ पितृभ्यः स्वधानमइतिदद्यात्॥ ततोबलिशेषान्नलिप्त
पात्रंप्रक्षाल्य॥ ॐ यक्ष्मैतत्तेनिर्णेजनंनमइतिवायव्यादिबलिदानं॥ प

(१६०)

रामः

११

स्यवत्स्यनन्तरं ॥ विष्णुपुराणे ॥ ततोन्यदन्नमादाय भूमिभागे शुचौ पुनः ॥ दद्यादशे
षभूतेभ्यः स्वेच्छया तत्समाहितः ॥ देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरग
दैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ पिपीलि
